6215

परिभाषेन्दुदीपिका

दरभङ्गामण्डलान्तर्गत 'ठाढी' ग्रामनिवासिना

पं० श्रीहरिशङ्करझाशर्मणा

संगृहीता ।

तत्पुत्रेण

श्रीविश्वम्भरझाशर्मणा

व्याकरण-साहित्य-वेदान्ताचार्येण

प्रकाशिता

विक्रेता

मोतीलाल बनारसीदास

नेपालीखपरा, वाराणसी-१

२० विक्रमवत्सरे] तृतीयावृत्तिः १००० [मूल्यम् ७५ न० पै०

प्राप्तिस्थानम्
मोतीलाल बनारसीदास
नैपाली खपरा, वाराणसी ।

अस्याः पुनर्मुद्रणाधिकारः प्रकाशकेन स्वायत्तीकृ

U. G. C. BOOK
No ....
S. V. U. College
Library,
TIRUPATI.
Acc. No 9512
Date 17/11/68

मुद्रक
पारिजात प्रेस,
रामकटोरा रोड, वाराणसी ।

भूमिका

अयि पाणिनीयाश्छात्राः !

परिभाषेन्दुशेखरस्य काठिन्यं गाम्भीर्यञ्च विदितचरमेव श्रीमद्भिः। तस्य सतीष्वपि बह्वीषु टीकासु न काचिदुपकृतिश्छात्राणामवलोक्यते। अवधार्य चैतत्सुगृहीतनामभिरस्मद्गुरुभिर्विद्यातपोनिधिभिः हरिशङ्करशर्ममहानुभावैः 'कामाख्या' नाम्नी टीका सकलटीकासारभूता व्यरचि। सा च शीघ्रमेव प्रकाशमेष्यति। परीक्षार्थिनामुपकृतये च तस्य प्रश्नोत्तरीरूपेयं 'परिभाषेन्दुदीपिका' तैरेव विरचिता, तत्पुत्रेण पं० श्रीविश्वम्भरशर्मणा व्याकरण-साहित्य-वेदान्ताचार्येण प्रकाशिता च। अनया च ग्रन्थस्यान्तःप्रविश्य परीक्षा-साफल्यमवश्यं लप्स्यन्ते भवन्त इत्याशासे।

गुरुचरणाश्च १९३४तमविक्रमवत्सरीयपौषकृष्णषष्ठ्यां मिथिलाप्रान्तीयाऽन्धराठाढ़ीग्रामे विद्वद्वरदिगम्बरशर्मण उपाध्याम् प्रादुर्भूताः। बाल्ये मिथिलायामेव व्याकरणं परिसमाप्य, काशीं गता २२ वर्षावस्थायामेवाधिगतवेदितव्याः बड़ोदादरभंगादिराज्येषु व्याकरणपुराणादि-विषयेषु लब्धप्रतिष्ठापत्रमालवन्तः बहुकालं स्वगृह एव एव वृत्तिदानपुरःसरं शतशश्छात्रान्-

ध्याप्य पञ्चविंशतिवर्षेभ्योऽप्यधिककालपर्यन्तं बरेली
विद्यालये प्रधानाध्यापकपदमलङ्कृत्य, गृहे स्थिता वि
सुकृतानुष्ठानपरायणाः, श्रीविश्वम्भर-श्रीदिवाकरशर्मणे
प्राक्यनव्यतन्त्रौ श्रीगुणाकरकुमारश्चेति पुत्रत्रयं कन
हित्वा पुत्रपौत्रभ्रातृभ्रातृजादिभिः सेव्यमानचरण
ध्यानपराः २००५तमविक्रमवत्सरीयफाल्गुनकृ
शिवसायुज्यमलभन्निति सप्रश्रयमावेदयति ।

पौषकृष्णाष्टमी
२००६ वि० सं०

कविसार्वभौमः, विद्यार
पं० श्रीव्रजेन्द्रचन्द्र
आयुर्वेदविशारदाचार्य
श्रीकल्पद्रुमकिचित्सालि
श्रीकालीवाड़ी, बरे

॥ श्रीसाम्बशिवो जयति ॥

❀ परिभाषेन्दुदीपिका ❀



नत्वा साम्बं शिवं ढुण्ढि कुरुते हरिशङ्करः ।
बालानां सुखबोधाय परिभाषेन्दुदीपिकाम् ॥

अस्मिन् ग्रन्थे त्रीणि प्रकरणानि सन्ति—शास्त्रत्वसम्पादकं, बाधबीजकथनं, शेषाख्यञ्चेति । तत्रादित एकदेशविकृतमनन्यवदित्यन्तमाद्यम्, तत उभयनिर्देशे पञ्चमीनिर्देशो बलीयानित्यन्तं द्वितीयम्, तत आसमाप्ति तृतीयम् । परिभाषास्तु चतुर्विधाः सन्ति, काश्चिद् वाचनिकाः, काश्चिज्ज्ञापकन्यायसिद्धाः, काश्चिद्भाष्यवार्त्तिकयोरुपनिबद्धाः, काश्चित्पाणिनिप्रणीताः । तासां लक्षणन्तु लिङ्गवत्त्वे सति नियामकत्वम् । नियामकत्वमित्यस्य अनियमे नियमकारिणीत्वमित्यर्थः । अनियमत्वं च न्यूनाधिकवृत्तित्वम्, नियमत्वं च सङ्कोचकत्वम् । केवलवाचनिकानामपि लिङ्गवत्त्वमस्त्येव,

किन्तु भाष्ये वचनरूपेण पठितानीति ग्रन्थक
अथ वा विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगि साधुत्व
शक्त्यविषयकबोधजनकत्वे सति अधिव
परिभाषात्वमिति परमगुरूणां मतमिति
अत्रत्यविशदविचारस्तु कामाख्यायां विस्तरः ॥

अवतरणत्वञ्च वक्तव्यार्थविषयकजिज्ञा
त्वम् । अवसरसङ्गतित्वञ्च स्मृतिविषय
उपेक्षानर्हत्वम् ।

सन्देहत्वञ्च एकधर्मिकविरुद्धकोटिद्वयावग
त्वम्, यथा—स्थाणुर्वा पुरुषो वेति । प्रकृते,
कारादिणान्तसमुदायघटकवर्णत्रयबोधतात्पर्येण,
तादृशवर्णचतुर्दशबोधतात्पर्येण पाणिनिनोच्च
पाणिनितात्पर्य्यसन्देहे सति निश्चयात्मकः श
न स्यादित्याशयेन परिभाषामवतारयति नन्विति
महेश्वरोपदिष्टणकारज्ञापितत्वेन सर्वासाञ्च
जनकतुल्यत्वेन चाऽभ्यर्हितत्वात् प्रथमोपपादनम्
इत्यनुमीयत इत्यर्थः । तथाहि अस्मदाद्यः
पदं व्याख्यानातिरिक्तनिमित्तानपेक्षम् , अस
मुनिना कृतत्वात् ॥ २ ॥

यथोद्देशं संज्ञापरिभाषं कार्यकालं संज्ञापरिभाषमित्यत्र प्राचीननवीनयोः को विशेष इति सप्रमाणं लिख ॥

यथोद्देशपक्षे प्राचीनमते संज्ञाशास्त्रपरिभाषाशास्त्रयोः स्वदेशे वाक्यार्थबोधे जाते, भविष्यति किञ्चिदनेन प्रयोजनमिति ज्ञानवान्—प्रतिपत्ता, सकलशास्त्रे गृहीतशक्त्या गृहीतपरिभाषार्थेन च कार्यनिर्वाहं करोति। अर्थात् विधिशास्त्राणि परिभाषादिदेशे गत्वा तत्राधिकरणन्यायेन गृहीतशक्त्यादिनैव लक्ष्यसंस्कारकं स्ववाक्यार्थं सम्पादयन्ति। तत्र चैतावान् विशेषः—संज्ञादिशास्त्राणां यथोद्देशपक्षे स्वदेशे विधिशास्त्रैः सह वाक्यैकवाक्यतया बोधः। सा चोपजीव्योपजीवकभावापन्नबोधविषयत्वरूपा। कार्यकालपक्षे तु पदैकवाक्यतया उभयोर्बोधः। सा च निरूप्यनिरूपकभावापन्नविषयताप्रयोजकपदघटितत्वरूपा। अत एव तत्रत्यपूर्वत्वपरत्वं विप्रतिषेधादिशास्त्रप्रवृत्तिबीजम्। अन्यत्सर्वं मूले स्पष्टम् ॥ ३ ॥

नवीनमते यथोद्देशे यत्र देशे परिभाषोपदिश्यते तद्देश एव विधिसूत्रेण सह पदैकवाक्यतया लक्ष्यसंस्कारोपयोगिबोधः परिभाषया संपाद्यते; अतस्तत्रत्यपरत्वादिकं विप्रतिषेधशास्त्रप्रवृत्तौ बीजम्। अत एव एकदेशस्थः सर्वं

शास्त्रमभिज्वलयतीति भाष्यं सङ्गच्छते । क
तु त्रिपाद्यामप्युपस्थितिः—अर्थात् अदृष्टपि
त्रिपादीस्थैर्विधिशास्त्रैरेव स्वसंस्कारको बोध
जन्यते । एवञ्च पक्षद्वयेऽपि परिभाषाणां
तथैव बोधकत्वम् । संज्ञाशास्त्राणां आकडाराद्य
न स्वदेशे वाक्यार्थबोधः पृथक्; किन्तु वि
सहैव । अत एवैतद्विषये व्यवहर्तुं न्यायाप्रवृत्ति
एतद्विषये विधिदेशीयपूर्वत्वादीनामेव लक्ष्योप
अत एवैषां कार्यकालत्वमेव; तेन अमी अः
दिभ्यः परैव प्रगृह्यसंज्ञा इति अमू अमी इ
प्रगृह्यस्येत्यनेनानुनासिकत्वं नेति च भाष्योक्त
आकडारीयसंज्ञाविषये यथोद्देशस्यैव स्वीका
राजन्य इत्यादौ परत्वात्पदत्वेन नलोपो नेति
मूलोक्तदिशावसेयम् ॥ ३ ॥

**/ अनुबन्धानामनेकान्तत्वं सम्यगुपपाद्य, सिद्ध
गुपपादयत ?**

अनुबध्यन्ते परस्मिन् संबध्यन्ते तेऽनुब
वृक्षकाकयोः संयोगसम्बन्धवदत्रापि तथा स
वत्वम्, वृक्षशाखयोः समवायवदत्रापि तथा

यवत्वामिति संदेहबीजम् । तथा चाऽनुबन्धा बोधकावयवाः, अनवयवा वेति सन्देहाकारः । ननु सन्देहपदमहिम्नैव उभयोर्लाभे उभयोः पुनरुपादानं व्यर्थमिति चेन्न, द्विविधानुमाने उभयोः पक्षतात्वसिद्धये उभयोरुपादानस्यावश्यकत्वात् । तथा च अनुबन्धा बोधकानवयवाः, विधेये कदाप्यदर्शनादित्यनुमानप्रयोगः सिद्धः ॥

ननु हेतुमप्रदर्श्य उपनयादेः पूर्वं प्रदर्शनं विरुद्धमिति चेन्न ;'अनुबन्धा बोधकानवयवाः, बोधकघटकत्वेनोपलब्धिविषयताशून्यत्वात्' इति प्रथमानुमानप्रयोगे बोध्यबोधकयोरन्वयाभावेन, हेतुतावच्छेदकरूपेण हेतोरसिद्धेरनुमानासम्भवात् । अतः अनुबन्धा बोधकघटकत्वेनोपलब्धिविषयताशून्याः, तदर्थभूते विधेये कदाप्यदर्शनात्'इत्यनुमानान्तरप्रयोग इत्यदोषात् । सकलदोषपरिहारायानुबन्धाः स्वघटित-पदाघटित-विभक्त्यघटितानुबन्धाघटित-पदघटक–वृत्तिश्रावणप्रत्यक्ष-विषयतावच्छेदक–धर्मावच्छिन्न-विधेयताप्रयोजकपदानवयवाः, स्वघटित-पदाघटित-पदघटकप्रयोज्य-विधेयतावच्छेदकधर्मवत्त्वस्वघटितघटकबोधकावयवोत्तरानवयवोत्तरत्व-उभयसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभावादित्यनुमानप्रयोगः कालात्ययभयान्न प्रपञ्चित इति दिक् ॥

यद्यप्यत्र पक्षे नानुबन्धकृतमित्यादि परिभाषात्र नारम्भणीयमिति लाघवं तथापि स्वसमीपेऽनुबन्धे स्वनि पितावयवत्वमारोप्यते इत्यारोपवाक्यकरणमनुबन्धघटित सौत्रविभक्तिकल्पनं हलन्त्यमित्यत्रान्त्यशब्दः परसमी बोधकः, 'चुटू' इत्यादावादिशब्दः पूर्वसमीपबोधकः, f किदित्यादौ अवयवत्वारोपः, वुञ्छणित्यादौ दोषवार ज्ञापकानुसरणमित्यादि महद्गौरवमिति एकान्ता अनुब इत्येव न्याय्यमिति एकान्तपक्षो व्यवस्थापितः । चानुबन्धाः स्वघटित-पदाघटित-पदघटक-बोधकावय शास्त्रघटकबोधकघटकत्वेनोपलब्धिविषयत्वे सति स्व घटकत्वेनोपलब्धिविषयताशून्यत्वात् । अनवयवो हि क्व दिरेकजातीयसम्बन्धेन गृहादिषूपलभ्यते नैवमयमित्यनु प्रयोगः । अनयोर्विशदविचारस्तु कालभयात् कर्तुमः इति दिक् ॥ ४ ॥

/ नाऽनुबन्धकृतमनेकाल्त्वमित्यस्या अवतरणपूर्वकं सहितं फलं लिख ॥

-ननु अनुबन्धानामेकान्तत्वे औशादीनामप्यनेक त्त्वेनैव सिद्धेऽनेकाल्सूत्रे शिद्ग्रहणं व्यर्थमतमाह— बन्धेत्यादि । अत्र चेदमेव शिद्ग्रहणं ज्ञापकम् । न श्यत इत्यादेश इति योगमहिम्ना बोध्यस्यैवादेशात्

स्वसिद्धान्तत्वाद् औशादिस्थले आदेशस्यानेकाल्त्वाभावेनानेकालादेशः सर्वस्येत्यर्थकानेकाल्सूत्राप्राप्त्या कथं शिद्ग्रहणं व्यर्थमिति वाच्यम् ? अनेकाल्बोधकबोध्यः सर्वस्येत्यर्थकरणेनादोषात् । एवञ्चनुबन्धेतराल्विशिष्टत्वमनेकाल्त्वमिति फलितम् । वैशिष्टयञ्च स्वघटितत्व—स्वेतरानुबन्धेतराल्घटितत्वोभयसम्बन्धेन । ननु परिभाषास्वीकारे ड्डाणलादीनां कथं सर्वादेशत्वमिति चेन्न ? सर्वादेशत्वं विनाऽनुबन्धत्वस्यैवाभावेन प्रकृतपरिभाषाया अप्रवृत्तौ आनुपूर्व्यैव सिद्धेः । ननु इत्संज्ञायोग्यत्वमनुबन्धत्वमिति स्वसिद्धान्तात् कथमियमुक्तिरिति चेन्न । आनुपूर्व्यात् सिद्धमित्यस्य डा आ ण अल् इत्यानुपूर्व्यात् सिद्धमित्यर्थात् । परिभाषाफलन्तु अर्वणस्त्रसावित्यादिविहितत्रादेशः सर्वस्य नेति । अन्यत् स्वयमूहनीयम् । केचित्तु ऊङ्तृङ् इत्यादिन्यासेन सिद्धे परिभाषा, शिद्ग्रहणं च व्यर्थमित्याहुः ॥५॥

' कार्यमनुभवन्निस्यस्या अवतरणसहितं फलं सम्यगुपवर्ण्य कथं चैषा भाष्ये ध्वनितेति सफलं लिख ॥

अध्येताशयितेत्यादौ धातोर्ङित्वेन क्ङिति चेति गुणनिषेधमाशंक्य परिभाषामवतारयति—नन्वित्यादि । न चाऽत्र कित्साहचर्यात् ङितोऽपि धातुविहितस्यैव ग्रहणान्न दोष इति वाच्यम् ? किन्निष्पन्नाधिशब्दादाचारक्विपि

आधयतीत्यस्योपलक्षकत्वेनादोषात् । यदि च पूर्वोक्तस
चयात् कित्पर्याप्तनिमित्तताकगुणस्यैवानेन निषेध इत्युच
तदा अरिरिषतीत्यस्योपलक्षकत्वं बोध्यम्, अत्रेसो द्वित्वनि
त्तत्वेन द्विर्वचनेन पूर्वं द्वित्वे ततो गुणे उक्तरूपासिद्धे
परिभाषया इसो निमित्तत्वाभावबोधने द्विर्वचनेऽचीत्यस
प्राप्तौ परत्वाद्गुणे रिस्शब्दस्य द्वित्वे रूपसिद्धिः । इ
तावत् परिभाषाफलं ज्ञेयम् ।

स्थण्डिलाच्छयितरीति निर्देशश्चास्या ज्ञाप
वस्तुतस्तु समवायिकारणनिमित्तकारणयोर्भेदस्य स
लोकतन्त्रप्रसिद्धतया नैषा ज्ञापकसाध्या । अत एव प
षायां हिः प्रयुक्त इति मूले स्पष्टम् । ऊर्णुनुविषती
सिद्धये कार्यमनुभवन्निति, अन्यथा सन्यङोरित्यस्य ष
न्तत्वात् इसो द्वित्वनिमित्तत्वाभावे द्विर्वचनेऽचीत
प्राप्तौ गुणावादेशयोः सतोरभ्यासे उकारश्रवणाना
तन्निवेशे तु इसो द्वित्वरूपकार्यानुभवकर्तृत्व
परिभाषाया अप्रवृत्तावुक्तं रूपं सिद्धम् । द्विर्वचने
सूत्रे भाष्ये ध्वनितैषा । तत्र हि 'अचि किं ? जे
देध्मीयते' इत्युक्तम् । एतत्परिभाषाभावेऽज्ग्रहणस
द्वित्वनिमित्तोऽच् घ्राघटकाकारस्तन्निमित्तताको

ई घ्राध्मोरितीत्वादेशस्तस्मिन् कर्तव्ये द्विर्वचनेऽचीति निषेधात् प्रत्युदाहरणासंगतेः। अतोऽनुमीयते कार्यी निमित्ततया नाश्रीयते इति। एवमपि कार्यी यकारस्तस्य निमित्तत्वेनाश्रयणाभावे द्विर्वचनेऽचीत्यस्याप्राप्तौ जेघ्रीयत इत्यादेः सिद्धौ अज्ग्रहणं व्यर्थमेव स्यादिति कार्यमनुभवन्नित्यस्याप्यनुमानमिति विशेषणविशिष्टा ध्वनितेति संक्षेपः ॥३॥

यदागमा इत्यस्याः सावतरणमर्थं निरूप्य, अनित्यत्वे प्रमाणं फलं चोपपाद्य, यमुद्दिश्य विहित इत्यादेराशयमुपवर्ण्य वर्णग्रहणेऽप्रवृत्तौ दोषमुद्भाव्यास्याः स्थानिवत्सूत्रेण गतार्थता न वेति विशदय्य लिख ॥

दाधा घ्वदाबिति सूत्रे विशिष्टरूपोपादानसत्त्वे नार्थवद्ग्रहणपरिभाषोपस्थितौ आगमसमभिव्याहारे आगमविशिष्टस्यैवार्थवत्त्वमिति न्यायेन प्रणिदापयतीत्येतद्घटकदाशब्दस्यार्थवत्त्वाभावेन घुसंज्ञाया अप्राप्तौ कथं णत्वमित्याशंक्य परिभाषामवतारयति—ननु प्रणिदापयतीत्यादीना।

यत आगमपदवाच्याः यन्निष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्नविधेयताश्रयाः शास्त्रेण बोधिताः, अतस्तन्निष्ठविधेयतानिरूपक-बोधनिष्ठजन्यतानिरूपितशब्दनिष्ठ—जनकतानिरूपितजन्यतावद्बोधीयविषयताश्रयत्ववन्त इति परिभाषार्थः। अर्थादागमिबोधकशब्दानां स्वविशिष्टे

लक्षणायामियं तात्पर्यग्राहिका । वैशिष्ट्यं च स्वघटितत्व-स्वविशिष्टाघटितत्वोभयसम्बन्धेन अत्र वै०, स्वभिन्नत्व-स्वघटकभिन्नत्व-स्वनिष्ठोद्देश्यतानिरूपितावयवत्वावच्छिन्न-विधेयताश्रयघटितभिन्नत्वत्रितयसम्बन्धेन । लक्षणकृत्यं स्वयमूहनीयम् ।

लोके देवदत्तस्याङ्गाधिक्येऽपि तद्विशिष्टस्यैव देवदत्त-शब्देन ग्रहणवत् शास्त्रेऽपि ग्रहणमिति लोकसिद्धोऽयमर्थो नाऽत्र ज्ञापकापेक्षा ।

अत्र यमुद्दिश्य विहित इत्युक्तेः प्रनिदारयतीत्यादौ दारित्यस्य न घुत्वम् । अन्यथा अवयवावयवः समुदाया-वयवो भवतीति न्यायेन रेफस्य दावयवत्वेऽनया परिभा-षया तन्निरूपितावयवत्वेन घुसंज्ञापत्तेः । उक्तन्यायस्तु दीधीवेवीटामित्यत्रेड्ग्रहणेन ज्ञापितः ।

आने मुगिति मुग्विधानसामर्थ्यादेषाऽनित्या । अन्यथा पचमान इत्यत्राऽनया परिभाषया अम्शब्देऽक्त्वातिदेशे दीर्घापत्तौ मुग्विधानवैयर्थ्यं स्पष्टमेव । मुग्विधानसा-मर्थ्येन रूपवैलक्षण्यकल्पनन्तु भाष्ययुक्त्यादिविरोधेन हेय-मेव । तेन दिदीये इत्यत्र युड्विशिष्टेऽनयाऽच्त्वातिदेशे, 'एरनेकाच'इति यण् न, जहारेत्यत्रार्शब्दे आत्वातिदेशे आत औ णल इति च नेति ।

प्राचीनास्तु मुग्विधानसामर्थ्येन वर्णग्रहणेऽस्या अप्रवृत्तिं ज्ञापयन्ति। तन्न साधु, बहुभाष्यविरोधात्। तथाहि पचमान इत्यत्रानया परिभाषयोपदिश्यमानत्वमादाय तास्यनुदात्तेदित्यादि स्वरसिद्धिर्भाष्ये उक्ता। एवं कुर्वन्नास्ते इत्यत्र आद्यनकारस्य पदान्तग्रहणेन ग्रहणात्पदान्तस्येति णत्वनिषेध इति भाष्ये उक्तम्। एवम् ऋकारस्य गुणवृद्धी अरारावेवेति नियमोपपत्तये रेफविशिष्टेऽनया परिभाषया गुणत्वाद्येष्टव्यमिति च भाष्ये उक्तम्। वर्णग्रहणेऽप्रवृत्तौ तु सर्वमिदमसङ्गतं स्यात्। एषु अवान्तरविचारो बहुकालहर इति दिक्।

ननु शब्दानित्यत्ववारणाय 'अनागमकानां सागमका आदेशा' इति भाष्यपर्यालोचनयागमविधायकशास्त्रस्येड्रहितबुद्धिप्रसङ्गे सेड्बुद्धिः कर्तव्या इत्याद्यर्थे आदेशेष्विवागमस्थलेऽपि बुद्धिविपरिणामादानुमानिकस्थानिवद्भावेनैव सिद्धे वृथेयं परिभाषेति चेन्न, साक्षादष्टाध्यायीबोधितस्थान्यादेशभावमादाय स्थानिवत्सूत्रस्य चारितार्थ्यसंभवे आनुमानिकागमस्थलीयस्थान्यादेशभावे प्रवृत्तौ मानाभावात्। न च परिभाषाऽकरणलाघवादत्रापि प्रवृत्तिरिति वाच्यम्? एवं सति स्थानिवद्भावबोधितस्य निर्दिश्यमानत्वमिष्टमिति सर्वमतसिद्धतया, अपिबदित्यत्र लाव-

स्थायामडिति सिद्धान्तेन पूर्वमटि आनुमानिकस्थानिवद्भा-वेनागमसहितस्य पिबादेशापत्तेः । न च स्थानिवद्भाव-बोधितस्य निर्दिश्यमानत्वं नेति भ्रमितव्यम् । तिसृणा-मित्यत्र परत्वात्तिस्रादेशे स्थानिवद्भावेन त्रयादेशमाशङ्क्य सकृद्गतिन्यायेन भाष्ये समाधानात् । अन्यथा निर्दिश्य-मानपरिभाषयैव वारणसम्भवे भाष्यस्य निर्दलत्वापत्ते-रिति दिक् ॥७॥

निर्दिश्यमानपरिभाषाया अवतरणसहितं ज्ञापकं फलञ्चो-पपाद्य वर्णग्रहणे प्रवृत्तौ साधकं चोपदर्श्य तन्मध्यपतितन्यायेन बोधितस्य निर्दिश्यमानत्वसाधिकां युक्तिं विलिख्य निर्दिश्य-मानत्वं निर्दुष्टं परिष्करणीयम् ॥

यदागमपरिभाषया अस्थाशब्दस्य ग्रहणादुदस्था-दित्यत्र उदः स्थास्तम्भोः पूर्वस्येति पूर्वसवर्णवारणाय परिभाषामवतारयति—नन्वेवमुदस्थादित्यादिना ।

अस्याञ्च षष्ठी स्थानेयोगेति सूत्रमावर्तते, तत्र द्वितीये षष्ठीपदं तदन्ते लाक्षणिकम् षष्ठी अन्ते यस्येत्यर्थकम् । अर्थात् सूत्रे उच्चार्यमाणं निर्दिश्यमानमिति यावत् । सूत्रे उच्चार्यमाणस्य कार्यासम्भवेन उच्चार्यमाणसजातीयस्य ग्रहणम्, एवं चोच्चार्यमाणसजातीयं स्थानेन स्थाननिरू-पितसम्बन्धेन युज्यते न प्रतीयमानम् । अर्थात् यदागमा

येन विधिरिति शास्त्रगृहीतमित्यर्थस्तेनेयं परिभाषा सिद्धा। अस्याश्च सुपद उदस्थात् स्नात्वाकालकीकृत्य अरुदिताम् अपिबदित्यादीनि फलानि तावद् बोध्यानि ॥ इयङुवङो-ङित्वेन च वर्णग्रहणेऽस्या अप्रवृत्तिरिति प्राचीनमतं ह्यवरडिति सूत्रभाष्यविरुद्धमित्यादिमूले समाहितम् ॥ अनाप्यकः, नेदमदसोरकोरिति सूत्रयोरक इति पर्युदासेन तन्मध्यपतितन्यायबोधितस्य निर्द्दिश्यमानत्वमिष्टमेवेति बोध्यते, अत एव भिन्धकीत्यत्राकचि धित्वं न प्राप्नोति इति व्याख्यानं संगच्छते। निर्दिश्यमानत्वञ्च षष्ठीप्रकृतिविशिष्टत्वम्, वै० स्वप्रयोज्यशाब्दबोधीयविषयताश्रयत्व-स्वजन्योपस्थितीयविषयताश्रय–विशिष्टाघटितत्वोभयसम्बन्धेन। अत्र वैशिष्टयम् स्ववृत्यानुपूर्वीमदघटकत्व-स्वनिष्ठोद्देश्यतानिरूपितविधेयताश्रय-स्त्रीप्रत्ययेतरत्वोभयसम्बन्धेन निर्जरसौ, अपिब्रत्, ईजरसो, जराया जरा जराजरा, तौ जराजरसौ, जरा च जरा च जरसौ, सजुषः सजूः सजूः सजूरित्यादिऽष्येषु यथासम्भवं लक्षणं संगमनीयम् ॥ ८ ॥

/यत्रानेकेति परिभाषायाः प्रमाणावतरणोदाहरणानि ग्लिख्य तमब्ग्रहणमेवानेकविधान्तर्यसत्तागमकमित्यस्य ात्पर्यं लिख ॥

इकारोकारयोः स्थाने तालुस्थानादिजन्यत्वेन सादृश्या-

देकारौकाराविव मात्राकालिकत्वरूपप्रमाणकृतसादृश्य
च्चेता स्तोतेत्यादौ अकारोऽपि स्यात्, अतः आदेशनिय
मिकां परिभाषामवतारयति—ननु चेता, स्तोतेत्यादिना
अत्र मानन्तु 'षष्ठी स्थान' इत्यतः स्थानेग्रहणेऽनुवर्तम
पुनः स्थानेऽन्तरतम इति सूत्रे स्थानेग्रहणम्। तां
वाक्यभेदेन सम्बध्यते। तथाहि स्थानेऽन्तरतम इति सू
अन्तरतम इति वाक्यं पूर्वं पठनीयम्, तत्र 'स्थाने' इत्य
वर्तते, प्रसङ्गे सति सदृशतम आदेश इत्यर्थः। ततः स्थ
इति वाक्ये स्थाने इत्यनुवृत्तिसहिताऽन्तरतम इत्यनुवृतम्
तत्रैकं च तृतीयया विपरिणामेन स्थानेनेत्यर्थकम्, ततश्च
प्रसंगे सति स्थानेन स्थानघटितधर्मेण सदृशतम इत्यर्थः
एवं च पूर्ववाक्येनैव सिद्धे इदं व्यर्थं सत् सति सम्भ
स्थानेनैव सदृशतम इति नियमार्थम्, तेनैषा सिद्धा। आदेश
वृत्त्यतिशयश्च स्ववृत्तित्व-स्वस्थानिवृत्तित्व-स्वेतरया
दादेशावृत्तित्व–त्रितयसम्बन्धेन स्वविशिष्टधर्मवत्त्वरूपः
तेन लाकृतिरित्यादौ वकारो नेति दिक्। तमबग्रहण
मेवेति। समानं स्थानं यस्येत्यर्थक 'सस्थान' इति न्यासेनै
सिद्धेऽन्तरग्रहणसामर्थ्यादन्तरतम इत्यर्थलाभसम्भवात्तमब
ग्रहणं व्यर्थं सदनेकविधान्तर्यसत्तागमकमिति तत्त
त्पर्यम्। स्थानत आन्तर्यस्येको यणचीत्यादिः। अर्थ

ग्र पद्दन्, तृज्वत् क्रोष्टुरित्यादि । स्थान्यर्थाभि-
र्स्यैवादेशतेति सिद्धान्तात् तत्समानार्थ-तत्समान-
दीनां पदादयः । गुणत आन्तर्यस्य वाग्घरिरि-
प्रमाणतोऽदसोऽसेरित्यादि चोदाहरणानि ॥१॥

स्वग्रहणपरिभाषाया अवतरणपूर्वकं भाष्यमते सूत्रमते लिख ॥

रूपानुपूर्वीविशिष्टे विधीयमाना वृद्धिः प्रोढवान्
स्यादतः परिभाषामवतारयति—ननु प्रोढवान्
। भाष्यमते शब्दानां शब्देऽर्थे च खण्डशः शक्तिः ।
शब्दविशिष्टेऽर्थे कार्यविज्ञानमित्यर्थस्य विशेष्यता,
अर्थे कार्यस्य बाधात् विशेषणे शब्दे कार्यविज्ञान-
रिभाषा सिद्धा । अत्रार्थश्च कल्पितान्वय-
कल्पितो लौकिकः, शास्त्रीयोऽपि गृह्यते, इयञ्च
न प्रवर्तते, किन्तु विशिष्टरूपोपादाने अर्थादानु-
ज्ञविषयताप्रयोजकपदोपादाने इति भाष्ये
। सूत्रमते तु स्वं रूपं शब्दस्येति सूत्रे स्वशब्देना-
चनाऽर्थो गृह्यते, रूपशब्देन स्वरूपम् । तदुभयं
ज्ञी । तत्र पूर्वोक्तयुक्त्या शब्दस्य विशेष्यता,

एवञ्च शब्दस्यात्मीयवाच्यर्थविशिष्टे कार्यमिति परिभाषा सिद्धेति दिक् ॥ १० ॥

गौणमुख्यन्यायस्याऽवतरणं प्रमाणं फलं प्रवृत्तिस्थलं च सयुक्तिकमुपपाद्य गौणत्वं मुख्यत्वञ्च परिष्करणीयम् ।

अर्थवद्ग्रहणपरिभाषास्वीकारेऽपि महद्भूतश्चन्द्रमा इत्यत्रारोपितमहत्त्वविशिष्टार्थकस्य महच्छब्दस्य आन्महत इत्यात्वापत्तिरतः परिभाषामवतारयति—नन्वेवमित्यादिना । अत्र मानं च स्वं रूपमिति सूत्रे स्वशब्देनात्मीयवाचिनाऽर्थो गृह्यते, तत्रात्मीयार्थो मुख्यार्थ एव; अनारोपितविषयत्वात् । एवञ्च मुख्यार्थविशिष्टे एव शास्त्रप्रवृत्तिस्तेनेदं सिद्धमिति । गुणादागतो गौण इति मूलरीत्या गौणत्वञ्च स्वशक्यतावच्छेदकसमानाधिकरणगुणसजातीयगुणदर्शनाधीन-स्वशक्यातावच्छेदकप्रकारकारोपीयविशेष्यताश्रयत्वम्, यथा गौर्वाहीक इत्यत्र वाहीके गोवृत्तिजाड्यमान्द्यादिदर्शनेन गोत्वारोपाद् गोपदस्य वाहीकार्थो गौणः । एवं कलङ्किन्यपि चन्द्रे महत्त्वारोपान्महच्छब्दस्य चन्द्रार्थो गौणः । एवञ्च संज्ञादिरपि गौणः, तद्गुणारोपादेव बोधात् । उक्तरूपगौणत्वं हि अप्रसिद्धत्वं गौणलाक्षणिकत्वं च गौणत्वमिति ग्रन्थेन प्रपञ्चितम् ॥ मुख्यत्वञ्च

तद्विशिष्टविषयतावत्त्वम् वै० स्वसामानाधिकरण्यस्वनिष्ठ-प्रकारताप्रयोज्यत्वोभयसम्बधेन ॥

प्राचीनास्तु—अन्यपदार्थनिष्ठविशेष्यतानिरूपितप्रकारताप्रयोजकत्वं गौणत्वं तेन प्रियत्रीणामित्यत्र त्रयादेशो नेत्याहुः, तन्नेत्युपपादयति–तेन प्रियत्रयाणामित्यादिना। अत्रैव तुष्यद्दुर्जनन्यायेन समाधानान्तरमाह—किञ्चेति। अर्थादेषा पदकार्ये एव प्रवर्तते, पदकार्यत्वञ्च स्त्रीत्वानिमित्तकत्वे सति सुब्विभक्त्यनिमित्तकत्वम्। अस्यैव प्रपञ्चो मूले। उपात्तम्-सूत्रे उच्चार्यमाणम्, विशिष्यार्थोपस्थापकम्—स्ववृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मावच्छिन्नबोधकम्, विशिष्टरूपं स्ववृत्त्यानुपूर्व्यवच्छिन्नविषयताप्रयोजकपदोपादानम्, यत्र तादृशे पदकार्ये एवेति ॥ ननु उक्तरीत्या निपातपदस्यानुपूर्व्यवच्छिन्नविषयताप्रयोजकत्वाभावेनोक्तपरिभाषाया अप्रवृत्त्या गोऽभवदित्यत्रत्यभाष्यविरोधोऽत आह—निपातपदं त्वित्यादिना। अर्थादुक्तभाष्यप्रामाण्येन चादिपदस्थानुपुर्व्यवच्छिन्नविषयताप्रयोजकत्वेनानुगततया परिभाषाप्रवृत्तिः सुलभा। गौणमुख्यन्यायप्रयोजकं बोद्धृसमवेतगौणत्वमेवेति बोधनाय गां पाठयेत्याद्युक्तिः ॥

वक्तुरपि पदे एव गौणत्वप्रतीतिर्न पूर्वमिति सप्रमाण-

मुपपादयति—किञ्च शुक्लामित्यादिना। अयं भावः-संस्कृत्य संस्कृत्य पदान्युत्सृज्यन्ते तेषां यथेष्टमभिसम्बन्धो भवतीति भाष्येण शुक्लामित्युक्ते कर्मनिर्दिष्टमित्यादिभाष्येण च सामान्यतः क्रियाजन्यफलाश्रयत्वादिविवक्षया द्वितीयादेः साधुत्वं भवतीत्यर्थस्य लाभेन, प्रयोगकाले गौणस्थलेऽपि प्रयोक्तुरपि पूर्वं गौणत्वाग्रहः।

एवं—"अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः। शास्त्रार्थस्तेषु कर्तव्य उक्तेषु न तदुक्तिषु" इति न्यायोऽपि पदकार्यविषय एवेति मूले सूत्रवार्त्तिकभाष्यैः प्रमाणितमिति दिक्॥ ११॥

भाव्यमानेनेति परिभाषाया अवतरणपूर्वकं प्रमाणजालमुपपाद्यार्थं लिख॥

त्यदादीनाम इत्यत्र सवर्णग्राहकताबलेनाऽनुनासिकादीनामपि ग्रहणादिममित्यादौ कदाचित्सानुनासिकस्याऽपि विधानं स्यादतः परिभाषामवतारयति—नन्वित्यादिना। परिभाषामानन्तु अणुदित्सूत्रे प्रत्ययः सवर्णग्राहको न भवतीत्यर्थकाऽप्रत्ययग्रहणम्। तथाहि भाष्ये प्रत्यये सनाशंसभिक्ष उरित्यत्रानभिधानेनादेशे ई हल्यघोरित्यादौ दीर्घोच्चारणेनागमे वृतो वेति दीर्घविधानेन सिद्धेऽप्रत्यय-

ग्रहणं ज्ञापयति—भाष्यमानेनेति । इदं च ज्ञापकमेकदेशानुमत्या । सर्वांशे ज्ञापकन्तु ज्यादादीयस इत्यत्र लोप इत्यनुवृत्त्यैव सिद्धे आकारविधानमङ्गवृत्तिपरिभाषाज्ञापकमित्युक्त्वा अकारविधानेऽपि आन्तरतम्याद्दीर्घे सिद्धे दीर्घोच्चारणमस्या ज्ञापकमित्युक्तं भाष्ये । विधेयताप्रयोजकपदेन स्वावृत्तिधर्मवतां सवर्णानां ग्रहणं नेत्यर्थे त्यदादीनाम इत्यादौ तद्व्यक्तित्वादिधर्मवतां शुद्धह्रस्वादाकारादीनामपि ग्रहणं न स्यादतः स्वावृत्तिश्रावणप्रत्यक्षविषयतावच्छेदकधर्मवतां सवर्णानां ग्रहणं नेत्यर्थेनादोषात् । मूले तु अणुदित्सूत्रेण प्राप्तं जातिपक्षेण प्राप्तं गुणाभेदकत्वेन प्राप्तं तपरसूत्रेण च प्राप्तं सवर्णग्रहणमप्रत्यय इत्यनेन सामर्थ्यान्निषिध्यत इत्युक्तमिति दिक् ॥ १२ ॥

वर्णाश्रये नास्ति प्रत्ययलक्षणमित्यस्या अवतरणप्रमाणसहितमर्थं निरूप्य वर्णप्राधान्यं चोपवर्ण्य भाष्यमते वार्तिकमते चात्र को विशेष इति सयुक्तिकमुपपादय ? ॥

गवे हितं गोहितमित्यादौ प्रत्ययलक्षणेनावाद्यापत्तिरतः परिभाषामवतारयति—नन्वित्यादिना । अत्र मानन्तु प्रत्ययलोप इति सूत्रेण स्थानिवदित्यनुवृत्त्यैव सिद्धे प्रत्ययलक्षणग्रहणं प्रत्ययस्येतराविशेषणत्वरूपं यत्र प्राधान्यं तत्रैव तदिति नियमार्थं तेनेदं सिद्धमिति । परिभाषार्थस्तु

लुप्तप्रत्ययवृत्तिवर्णत्वव्याप्यधर्मावच्छिन्न–विषयतानिरूपककार्ये प्रत्ययलक्षणन्नेति। वर्णप्राधान्यञ्च स्वावयवनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वम्। तेन गोहितमित्यत्र वर्णप्राधान्यसत्त्वेन न दोषः। मूले तु प्रत्ययनिरूपितविशेष्यतारूपं चेत्युक्तं तस्य प्रत्ययनिष्ठप्रकारतानिरूपितवर्णनिष्ठविशेष्यताश्रयत्वमित्यर्थस्तेन चित्रायां जाता चित्रा इत्यत्राऽणो योऽकारस्तदन्तान् ङीबिति भाष्यसम्मतेऽर्थे वर्णप्राधान्यसत्त्वात् प्रत्ययलक्षणाप्राप्तौ ङीप्–नेति॥ वार्तिकमते तु मित्रशीरित्याद्यर्थं प्रत्ययलोपसूत्रस्यावश्यकत्वेन परिभाषाया आवश्यकत्वम्। भाष्यमते तु प्रत्ययलोपसूत्रस्य नियमार्थत्वादेव दोषाभावे परिभाषाकरणे प्रयोजनाभाव इति दिक्॥ १३॥

प्रत्ययग्रहण इत्यस्या अवतरणप्रमाणे विलिख्य भाष्योक्तप्रयोजनान्तरं साधु वर्ण्यताम्॥

देवदत्तश्चिकीर्षतीत्यादौ समुदायस्य सन्नन्तत्वेन सनाद्यन्ता इति धातुत्वापत्तौ सुपो धातु प्रातिपदिकयोरिति लुगापत्तेः। न चोक्तसूत्रे प्रातिपदिकसाहचर्यात् धातुसंज्ञाप्रयोजकस्य वृत्तिप्रयोजकस्य वा सुपो ग्रहणान्न दोष इति वाच्यम्? एतत्परिभाषाया असत्त्वे देवदत्तो गार्ग्येति तद्धितान्तस्य प्रातिपदिकत्वे तत्र च सुपः प्राति-

पदिकसंज्ञाऽप्रयोजकत्वेन वृत्त्यप्रयोजकत्वेन च साहचर्यस्य दौर्लभ्यात् । किञ्च सति धातुत्वे सन्यङोरिति देशब्दस्य द्वित्वापत्तेः, अडागमापत्तेश्चेत्यतः परिभाषामवतारयति— नन्वित्यादिना । प्रत्ययत्वव्याप्यशाब्दबोधीयविषयताप्रयोजकपदग्रहणे यस्मात् प्रकृतिरूपात् प्रत्ययो विहितस्तत्तदादितदन्तबोधकमिति परिभाषार्थः । अस्या मानं तु यस्मात्प्रत्ययविधिस्तदादिप्रत्यये इति योगं विभज्य गृह्यमाण उपतिष्ठते इति च अध्याहृत्य तदादिरूपांशसिद्धौ येन विधिरत्यनेन तदन्तांशः सिद्धस्तेनेयं सिद्धा ॥ प्राचीनास्तु प्रत्ययेन स्वप्रकृत्यवयवारब्धकसमुदायाक्षेपात्तद्विशेषणात्वेन तदन्तविधौ वृथेयं परिभाषेत्याहुस्तन्न, इः इयानित्यादौ तादृशसमुदायस्यासत्त्वेनाक्षेपासंभवात् । भाष्ये तु परमगार्ग्यायिण इति प्रयोजनान्तरमस्या उक्तम् । तत्र हि परिभाषाया अभावे परमगार्ग्येति समुदायस्यापि यञन्तत्वेन फगापत्तौ पारमगार्ग्यायिण इति स्यात् । गार्ग्य इत्येतन्मात्रे पर्याप्तैकार्थीभावाभावेऽपि तद्धितार्थेति सूत्रे उत्तरपदग्रहणेन शिवस्य भगवतो भक्तः शिवभागवत इति भाष्यप्रयोगेण एतद्भाष्यप्रयोगेण चापर्याप्तैकार्थीभावेऽपि क्वचिद्वृत्तिर्भवतीति दिक् ॥ १४ ॥

प्रत्ययग्रहणे चापञ्चम्या इत्यस्या अवतरणादिसहितमर्थं लिख ?

भाष्ये प्रत्ययग्रहणपरिभाषाघटकतदादिविशेष्यकतदन्तांशस्यापवादः पठ्यते—प्रत्यये ग्रहणे चापञ्चम्या इति। अव्यवहितोत्तरत्वसम्बन्धावच्छिन्नपञ्चम्यन्तपदप्रयोज्यप्रकारतानिरूपितविशेष्यताप्रयोजकं यत्पदं तत्तदादि रूपं विशेष्यमादाय स्वनिष्ठचरमावयवतानिरूपकसमुदायवृत्तिविषयताप्रयोजकं न भवतीति परिभाषार्थः, तेन दृषत्तीर्ण इत्यत्र धातुतकारस्य न नत्वम्। अन्यथा रेफदान्तात्परस्य निष्ठान्ततदादेरित्यर्थे दोषापत्तेः। परिभाषास्वीकारे तु तदाद्यवयवरेफदकारात् परस्य निष्ठातस्य नत्वमित्यर्थान्न दोषः, अन्यत्सर्वं मूले स्पष्टमिति दिक्॥

स्त्रीप्रत्यये चानुपसर्जनेनेति परिभाषा अवतरणज्ञापकसहिता स्ूपपादनीया।

ननु विशेष्यान्तरसत्त्वेऽपि क्वचित्तदादिविशेष्यकतदन्तविधेर्नित्यं समासेऽनुत्तरपदस्थस्येतिसूत्रेऽनुत्तरपदग्रहणेन ज्ञापनात् ष्यङन्ततदाद्यन्तपूर्वपदस्य संप्रसारणमित्यर्थे परमकारीषगन्धीपुत्र इत्यत्रेव अतिकारीषगन्ध्याः पुत्र इत्यात्रापि संप्रसारणं स्यादतः परिभाषामवतारयति—नन्वि-

त्यादिना । यद्वा, मरुवदुशीनरेषु जलमितिवत् अतिकारीष-गन्ध्याः पुत्र इतिवदत्रापि स्यादिति काकुः । यत्र लक्ष्ये-ऽनुपसर्जनस्त्रीप्रत्ययस्तत्र तदादिनियमो न, तदादिनाऽतदा-देर्व्यावृत्तिर्न, अतदादौ तदादित्वमारोप्यत इति यावदिति परिभाषार्थः । अतो यः स्त्रीप्रत्ययः स्त्रियं प्राधान्येना-हेत्यादि मूलग्रन्थोऽपि सङ्गच्छते । इयं च भाष्ये वचन-रूपेण पठिता, न तु ज्ञापकज्ञापिता । केचित्तु यस्मात्प्रत्यय-विधिरिति विभक्तयोगनेयङुवङित्यतोऽस्त्रीत्यस्य सम्बन्धेन प्रधानाप्रधानन्यायेनानुपसर्जनस्त्रीबोधकभिन्नप्रत्यये गृह्य-माणे तदादिरित्युपतिष्ठते इत्यर्थादियं लभ्यते—इत्याहुः । किमत्र बकबन्धनप्रयासेन ! अत्रोपसर्जनत्वञ्च स्वान्त-समुदायपर्याप्तशक्तिनिरूपकार्थविशेष्यतानिरूपितप्रकारता-वच्छेदकताप्रयोजकत्वम् यस्य प्रत्ययस्योपसर्जनत्वमिष्टं तत्त्वम् । अन्यन्मूले स्पष्टम् ॥१६॥

उत्तरपदाधिकारे प्रत्ययग्रहणे न तदन्तग्रहणमित्यस्या अवतरणं निरूप्य सकलदोषवारकमर्थं लिख ?

ननु रात्रेः कृतीत्यादाविव घरूपेति सूत्रे उत्तरपद-विशेष्यकतदन्तविधौ कुमारी ब्राह्मणिरूपेत्यादावव्याप्त्यति-व्याप्तिदोषापत्तिरतः परिभाषामाह—उत्तरपदाधिकारे इति । न चाऽत्र कर्मधारये बहुव्रीहौ वा पुंवद्भावस्य दुर्वारतया उक्त-

प्रयोगासंभवः, षष्ठीतत्पुरुषे तु नदीतरे प्रतिषेधो वक्तव्यो न वक्तव्यः समानाधिकरण इति वर्त्तते इति भाष्यस्वारस्येन समानाधिकरण एव ह्रस्वप्रवृत्त्या अवतरणासंगतिश्चेति वाच्यम् ? कुमारी ब्राह्मणिरूपेति वाक्ये ह्रस्वापत्तिरिति ग्रन्थाशयात्। वयोवाचिनामपि वैकल्पिकजातिकार्यस्य बहुशो भाष्ये दृष्टतया जातेश्चेति पुंवद्भावनिषेधे बहुव्रीहावपि दोषानुदयाच्च। हृदयस्य हृल्लेखेत्यत्र अणन्तत्वेनैव सिद्धे लेखग्रहणमस्यां ज्ञापकम्। ज्ञापकतापरभाष्येण घञन्तलेखस्याग्रहणात्। न च हृत्परमलेख इत्यत्र अण्णन्ततदादिरूपोत्तरपदपरत्वाभावेन हृदादेशानापत्त्या कथमस्या ज्ञापकत्वमिति वाच्यम् ? ज्ञापकतापरभाष्येण उक्तप्रयोगस्यानभिधानत्वकल्पनात्। गिलेऽगिलस्येत्यत्र तदन्तविधिनैव तिमिङ्गिलगिल इत्यस्य सिद्धौ गिलगिले चेत्येतत्सामर्थ्येन उत्तरपदाधिकारे प्रातिपदिकग्रहणे न तदन्तविधिरिति परिभाषान्तरस्यापि ज्ञापनेन लेखशब्दे तदन्तविध्यभावे उक्तप्रयोगस्यासाधुत्वाच्च ॥ रात्रेः कृति, एकतद्धिते चेत्यादिदोषवारणाय उत्तरपदाधिकारे कृदितरवृत्तिविषयताप्रयोजकं पदं तदन्तवृत्तिविषयताप्रयोजकं न भवतीति परिभाषार्थ इति दिक् ॥१७॥

संज्ञाविधावित्यस्या अवतरणज्ञापकसहितमर्थं लिख ।

प्रत्ययग्रहणपरिभाषया तरबन्ततदादेर्घसंज्ञायां कुमारीब्राह्मणितरा इत्यत्र कुमारीशब्दस्यैव ह्रस्वापत्तिरतः परिभाषामवतारयति—नन्वेवमित्यादिना। सुप्तिङन्तं पदमित्यत्रान्तग्रहणमस्यां ज्ञापकम् । न च ज्ञापितेऽपि फलाभावः, [स्वांशे चारितार्थ्याभावः] विधिप्रदेशे पदपदस्य प्रत्ययमात्रवृत्तित्वेन तदादितदन्तविधिनैव सिद्धेरिति वाच्यम् ? स्वादिष्विति विहितपदत्वस्य प्रकृतिमात्रवृत्तित्वेन पदग्रहणस्य प्रत्ययमात्रवृत्तित्वाभावात् ॥ संज्ञानिष्ठविधेयतानिरूपितसाक्षात्प्रत्ययप्रत्ययावयवान्यतरनिष्ठोद्देश्यताप्रयोजकपदघटितशास्त्रघटकप्रत्ययपदं स्वान्तवृत्तिविषयताप्रयोजकं न भवतीति परिभाषार्थः ॥ तेनाऽर्थवत्सूत्रे वः प्रत्ययस्य सामन्त्रितमित्यादिषु न दोष इत्यलम् ॥ १८ ॥

कृद्ग्रहणे गतिकारकपूर्वस्याऽपि ग्रहणमित्यस्या अवतरणसहितमर्थं लिख ।

प्रत्ययग्रहणपरिभाषया क्तान्ततदादिप्रकृतिकसुबन्तेन सह सप्तम्यन्तः समस्यत इत्यर्थकेन क्षेपे इत्यनेनावतप्ते नकुलस्थितमित्यत्र नकुलस्थितशब्दस्य तथात्वाभावेन समासो न स्यादतः परिभाषामवतारयति—नन्वेवमित्यादिना। कर्मणि क्तान्ते उत्तरपदेऽनन्तरो गतिः प्रकृतिस्वर इत्यर्थक-

गतिरनन्तर इति सूत्रेऽनन्तरग्रहणमस्यां ज्ञापकम् । तद्धि अभ्युद्धृतमित्यत्राभावातिव्याप्तिनिरासार्थम् । तत्र प्रत्यय ग्रहणपरिभाषयोद्धृतस्य क्तान्ततदादित्वाभावादेवाप्राप्त तद् व्यर्थं सदस्यां ज्ञापकम् । न चात्राभिशब्दस्य परत्व गतिर्गतावित्यनेन निघात एवेति कथं ज्ञापकत्वमि वाच्यम् ? पदात्परत्वाभावेन गतिर्गतावित्यस्याप्राप्तेरित्य दिना मूले स्पष्टम् । यत्र गतिकारकसमभिव्याहृतं कृद तत्र कृद्ग्रहणे तद्विशिष्टस्यैव ग्रहणम्—अपिशब्दात्तदस भिव्याहृतस्य केवलस्यापि—इति परिभाषार्थः । फलमस भाष्ये दत्तम्—सांकूटिनमिति, तत्रैतत्परिभाषाभावे संकूटि त्यस्येनुणन्ततदादित्वाभावेनाणिनुण इति विशिष्टादण्प्रत यानुत्पत्तौ रूपासिद्धेः । अत्र गतिकारकोपपदानामित्यादि कृदन्तेन समासो बोध्यः । तद्विशिष्टस्यैव ग्रहणमि नियमाभावे केवलं कूटिन्नित्यस्यापि इनुणन्तत्वात् पाक्षि दोषो दुर्वार इत्यन्यत्सर्वं मूले ॥ १९ ॥

व्यपदेशिवदेकस्मिन्नित्यस्या अवतरणसहितं ज्ञापक परिभाषाफलं चोपपाद्यासहायत्वलक्षणं लिख ।

अस्यापत्यमिरित्यादावदन्तप्रातिपदिकाभावादिञ् स्यादतः परिभाषामवतारयति—नन्वेवमित्यादिना । न येन विधिरिति सूत्रे स्वं रूपमित्यतः स्वशब्दस्यानुवृ

तत्प्रत्याख्याने तस्य चेति पाठेन च येनविधिरित्यनेनैवोपपत्तौ कथमिञ् न स्यादिति वाच्यम् ? इयायेत्याद्यर्थं परिभाषाया आवश्यकत्वेन तयैवेष्टसिद्धौ येनेति सूत्रे स्वशब्दानुवृत्तिस्तस्य चेति पाठो वा न कार्यं इत्याशयात् । निमित्तसद्भावाद् विशिष्टोपदेशो मुख्यव्यवहारो यस्यास्ति स व्यपदेशी, यस्तु व्यपदेशहेत्वभावादविद्यमानव्यपदेशः स असहायस्तेन तुल्यं वर्तते असहायेऽपि तत्कार्यं कर्तव्यमिति परिभाषार्थः । लोके एकपुत्रसत्त्वेऽपि अयं वै ज्येष्ठः कनिष्ठो मध्यमो वेति व्यवहारवल्लोकन्यायसिद्धेयमिति । असहायत्वं च मुख्यधर्मवदघटकत्वे सति मुख्यधर्मवदघटितत्वे सति मुख्यधर्मवदसमभिव्याहृतत्वम् । मुख्यधर्मश्चातिदिदिक्षितरूपस्तेन सभासन्नयने भव इत्यर्थे वृद्धाच्छ इति, दरिद्रातेरिवर्णान्तलक्षणोऽच्च नेति। अनया चादित्वान्तत्व-घटकत्वघटितत्वानामेवातिदेश इत्यादिविचारस्तु विस्तरभयान्निरस्तः ॥ २० ॥

ग्रहणवता प्रातिपदिकेन तदन्तविधिर्नास्तीत्यस्या अवतरणं ज्ञापकफलसहितं लिख ।

गर्गादिभ्यो यञित्यत्र तदन्तविधिना परमगर्गादिभ्योऽपि यञ् स्यादतः परिभाषामवतारयति—नन्वित्यादिना । प्रत्ययोगिद्वर्णग्रहणान्यतमभिन्नत्वे सति प्रातिपदिकवृत्तिविषयताप्रयोजकपदेन तदन्तविधिर्नास्तीति परिभाषार्थः । तेन

यञिञोश्च, अत इञ्, उगितश्च इत्यादौ निषेधाप्रवृत्तिः
अत्र च ज्ञापकम्—सपूर्वाच्चेति सूत्रम्, अन्यथा पूर्वादिनि
रित्यत्र तदन्तविधिनैव सिद्धे किं तेन ! इयञ्च समास
प्रत्ययविधौ प्रतिषेध इति वार्तिकस्थ-प्रत्ययांशानुवादिका
तेन निषेधप्रकरणे भाष्ये पृथक् नोक्ता, अत एव स्वर
परमस्वसा इत्यादि सिद्धिरिति दिक् ॥ २१ ॥

यस्मिन्विधिस्तदादावल्ग्रहणे इत्यस्याः फलसहितं ज्ञापक वतरणमर्थं च विलिख्य ङः सि धुडित्यत्र तीषसहेत्यत्र च दो परिहर्तव्यः।

वान्तो यि-इति सूत्रे तदन्तविधिना यान्ते प्रत्य
इत्यर्थसम्भवाद्यादौ प्रत्यय इत्यर्थः कथमतः परिभाषाम
तारयति—नन्वेवमित्यादिना। न च सति तदन्तविधौ यान्
प्रत्ययासम्भवात् सूत्रवैयर्थ्यमिति वाच्यम् ? गोयमतती
गोयात् तमाचष्टे णिचि, टिलोपे, यान्तप्रत्ययसंभवात्
टिलोपादेः स्थानिवत्त्वं तु न, सूत्रारम्भसामर्थ्यात्। परि
भाषार्थस्तु अभेदसम्बन्धावच्छिन्नाल्त्वव्याप्यधर्मावच्छि
प्रकारताप्रयोजकं यत्सप्तम्यन्तपदं तत्तदादिबोधकमिति
यत्र तु उभयोः सप्तम्यन्तत्वं तत्रैवेयं प्रवर्तते; अत एवा
धातुकस्येड्वलादेरित्यत्रादिग्रहणं चरितार्थम्, तेन ङः
धुडित्यत्र सादेः पदस्येति नार्थः, तीषसह-सेऽसिचीत्यत्र

भयोः सप्तम्यन्तत्वाभावेऽपि तकाराव्यवहितपूर्वस्येच्छत्यादिभ्यः परस्य बलाद्यार्धधातुकस्येडित्यर्थे न कोऽपि दोषः। शब्देन्दुशेखरोक्तसमाधानन्तु गौरवग्रस्तत्वेन हेयम्। इयञ्च भाष्ये वचनरूपेण पठिता। तेनाऽत्र ज्ञापकानुसरणक्लेशो विफल इति दिक्॥ २२॥

सर्वो द्वन्द्वो विभाषैकवदित्यस्या ज्ञापकावतरणार्था विलेख्याः।

घटपटं घटपटावित्यादिसिद्धये परिभाषामाह—सर्वो द्वन्द्व इति। न च समुदायेऽवयवगतसंख्याया आरोपे इतरेतरयोगद्वन्द्वः, अनारोपे समाहार इति व्यवस्थयैवोक्तरूपद्वयसिद्धौ वृथेयं परिभाषेति वाच्यम्? सर्वनामशब्देषु विवक्षाद्वयसत्त्वेऽपि अन्यत्र तत्सत्त्वे मानाभावात्। अत एव लोके वृक्षाः सन्ति, वनमस्तीति प्रयोगव्यवस्था, न तु वनानि वृक्ष इति। अस्या अर्थस्तु द्वन्द्वश्च प्राणि—इत्यादिप्रकरणाविषयः, सर्वो द्वन्द्वो विभाषैकवद्भवतीति। यद्यपि चार्थे द्वन्द्व इत्यनेन समाहारेतरेतरयोगयोरविशेषेण द्वन्द्वविधानादेव विभाषैकवद्भावस्य न्यायसिद्धत्वम्, तथापि द्वद्वश्च प्राणीत्यनेन प्राण्यङ्गादीनामेव समाहारो नेतरेषामिति प्राप्तविपरीतनियमव्यावृत्त्यै परिभाषाया आवश्यकत्वम्। तिष्यपुनर्वस्वोरिति सूत्रस्थं बहुवचनस्येति ग्रहण-

मस्या ज्ञापकम् । तद्धि तिष्यपुनर्वसु इत्यत्रैकवचन॰ द्विवचनव्यावृत्त्यर्थम् । न च जातिरप्राणिनामिति नि॰ कवद्भावेन बहुवचनाभावादिदं सूत्रं व्यर्थमिति वाच्यम् तद्वैकल्पिकत्वस्यापि अनेन बहुवचनग्रहणेन ज्ञापनादि दिक् ॥ २३ ॥

एकदेशविकृतमनन्यवदिति परिभाषाया अवतरणादिसहि मर्थं निरूप्य अक्तपरिमाणत्वं विवेचनीयम् ।

रामौ गच्छत इत्यादौ वृद्धौ कृतायां कार्यकालप निघातसिद्धये पदत्वं दुर्लभम् । उभयत आश्रयणेऽन्ता॰ वद्भावस्य प्राचीनमतेऽसिद्ध्या नवीनमतेऽतिदेशसहस्रेणा॰ यस्माद्विहितस्तदादितदन्तत्वस्यातिदेष्टुमशक्यत्वादिति प॰ भाषामवतारयति—ननु रामावित्यादिना । केचित्तु चका॰ सुषुपतुरित्याद्यर्थं परिभाषाया आवश्यकत्वमिति वदन्ति तन्न; स्वीयविधेयताश्रयावधिकपूर्वत्वस्वीयोद्देश्यविधेयोभय मात्रारब्धसमुदायघटकत्वोभयसम्बन्धेन द्वित्वशास्त्र विशिष्टोऽभ्याससंज्ञको भवतीत्यर्थेनादोषात् । परिभाषार्थस॰ स्वविशिष्टाघटितत्व—स्वघटकोद्देश्यकविकारघटितत्व—स्व घटकोद्देश्यकविकारेतरयावद्घटितत्वैतत्त्रितयसम्बन्धेन स्ववि॰ शिष्टं स्ववद्भवतीति । सम्बन्धघटकवै० स्वाघटकत्व स्वघटकमात्रोद्देश्यक-विकारेतरत्वोभयसम्बन्धेन । छिन्नपुच्छे

शुनि श्वत्वव्यवहारवल्लोकसिद्धेयम् । अथवा प्राग्दीव्यतोऽणिति सूत्रे दीव्यति शब्दैकदेशदीव्यच्छब्दानुकरणादेषा सिद्धेति भाष्ये उक्तम् । तेन विकृतावयवनिबन्धनकार्ये नैषा लक्ष्यानुरोधादियमनित्या च तेनाभीयादिति सिद्धिः ॥ अक्तपरिमाणग्रहणेऽपि नैषा; लोकदृष्टान्तात् । तत्त्वञ्च संख्यात्वपरिमाणत्वव्याप्यधर्मावच्छिन्न—प्रकारताक-बुद्धि-निष्ठप्रतिबध्यतानिरूपित-प्रतिबन्धकतावच्छेदकविषयाश्रय-विशिष्टत्वम् । वै० स्वघटितत्वस्वसमनियतत्वान्यतर-सम्बन्धेन परिच्छिन्नपरिमाणस्य जरात्वादेरनियामकत्वम् इति यावत् । अतोऽन्यत्सर्वं मूले स्पष्टमिति दिक् ॥ २८ ॥

इति शास्त्रत्वसम्पादकप्रथमप्रकरणम् ।



पुनः प्रसङ्गविज्ञानात् सिद्धमित्यस्या अवतरणं सम्यग्विवि प्रमाणं लिख ?

भिन्धकीत्यत्र भिन्तादित्यत्र वा परत्वात्तातङा बाधि तोऽकज्विधिर्वा न स्यात्, अतः परिभाषामवतारयति नन्वेवमित्यादिना । न च तातङो वैकल्पिकतया तदभावप तत्सिद्धिरिति वाच्यम्; विकल्पशास्त्रेण भावाभावयोरुभयं विधानात्, न चाप्राप्तविभाषास्थलेऽभावस्य सिद्धतया भाव मात्रस्यैव विधानम्, अत एव मुमुक्षते वत्स इत्यत्राभ्यास लोपो नेत्यवतरणमसङ्गतमिति वाच्यम्; तिसृणामित्य परत्वात्तिस्रादेशेन बाधितो नुट् न स्यात् इत्यवतरण मित्याशयात् । अत्र मानन्तु यथा लोके समबलयोरेव प्रेष्यः पर्यायेण कार्यं करोति, यौगपद्येन तु न; तथा लक्ष्य र्थयोः शास्त्रयोर्विरोधिलक्ष्ये यौगपद्येन प्रवृत्त्यसंभवाद्वैयर्थ्य प्राप्तौ विप्रतिषेधसूत्रं भवतीत्यादिशति । ततश्च परप्रवृत्त्य नन्तरं पूर्वप्राप्तौ तदपि प्रवर्तते इत्येतत्सिद्धमिति दिक् ॥१।

सकृद्गताविस्यस्या अवतरणपूर्वकं प्राचीननवीनमतं स प्रमाणं लिख ?

तिसृणामित्यत्र परत्वात्तिस्रादेशे स्थानिवद्भावेन त्रया देशः स्यादतः परिभाषामवतारयति—नन्वेवमित्यादिना नवीनमते क्वचित् लक्ष्ये चरितार्थयोः शास्त्रयोर्युगपदेक

स्मिन् उभयोः कार्ययोः प्रवृत्त्यसंभवेन तृजादिवत्पर्यायेणो-
भयोः प्रसंगे परमेवेति नियममुखेन विप्रतिषेधसूत्रप्रवृत्ति-
रित्येतन्न्यायसिद्धिः । कैयटादिमते तु व्यक्तिपक्षे व्यक्ते-
रानन्त्यात् प्रतिलक्ष्यं लक्षणोपप्लवेन उद्देश्यतावच्छेदकाव-
च्छिन्ने शास्त्रप्रवृत्त्या विरोधिलक्ष्यार्थयोरुपप्लवितयोरप्य-
चारितार्थ्येन पर्य्यायतया द्वयोरपि प्राप्तौ नियमार्थं विप्र-
तिषेधसूत्रमिति सकृद्गतिन्यायसिद्धिः । एतन्नियमवशात्
पूर्वशास्त्रानुपप्लव एव । जातिपक्षे तु उद्देश्यताव-
च्छेदकाक्रान्ते क्वचिदपि चरितार्थयोर्युगपदुभयासम्भवरूप-
विरोधिलक्ष्ये सत्प्रतिपक्षस्थलेऽनुमितेरिवोभयोरप्यप्राप्तौ
परविध्यर्थं विप्रतिषेधसूत्रमिति पुनः प्रसङ्गन्यायसिद्धिरिति।
अत्र नवीनाः—न ब्राह्मणं हन्यादित्यादौ सकलव्यक्तिग्रह-
णार्थतयैव जातिपक्षाश्रायणस्य भाष्ये दर्शनात्, व्यक्तिपक्षे
सर्वं लक्ष्यं शास्त्रं व्याप्नोति न जातिपक्ष इत्यत्र मानाभाव
इत्यादिना प्राचीनमतं खण्डयन्तीति दिक् ॥ २ ॥

विकरणेभ्यो नियमो बलीयानिति परिभाषा सावतरणप्रमाणं मर्थ्यताम् ।

ननु ख-श-चानशादौ विकरणस्य लिडादावनुदात्तङित
इत्यादिनियमस्य चावकाशेन एधत इत्यादौ परत्वाद्विकरणे

कथं नियमप्राप्तिस्तेन व्यवधानादतः परिभाषामवतारयति नन्वेवमित्यादिना । न च तिबादिविध्येकवाक्यतया नियमसूत्राणां विधायकत्वमिति सिद्धान्तात् लावस्थायां सार्वधातुकपरत्वाभावात् परत्वाद्विकरण इत्युक्तिरसङ्गतेति वाच्यम् ? तिप्तसिति सामान्यसूत्रविहितानामनुदात्तङित इत्यादिनियमेनेतरनिवृत्तिरिति पक्षाश्रयणेनावतरणदानात् । अत्र च वृद्भ्यः स्यसनोरिति ज्ञापकम्, अन्यथा स्यव्यवधाने नियमाप्रवृत्तौ सामान्यशास्त्रेणोभयपदसिद्धौ विकल्पविधायकस्यास्य वैयर्थ्यं स्पष्टमेव । ज्ञापिते त्वस्मिन्नत्र स्य इति विषयसप्तमीति भाष्यकैयटयोः स्पष्टम् ॥ शदेः शित इति सूत्रभाष्ये तु विकरणव्यवधानेऽपि नियमप्रवृत्तेरिदं ज्ञापकमित्युक्तम् । वस्तुतस्तु भिन्नवाक्यतया सामान्यशास्त्रेणोत्पत्तौ तु प्रधानप्रत्ययानुरोधेन तावत् प्रकृतिकल्पना कार्या, नियमेन प्रत्ययनिवृत्तौ च प्रधानकल्पितप्रकृतेर्वाचनिकी निवृत्तिः कल्प्येति महद्गौरवमिति प्रकृतज्ञापकेन तिबादिविध्येकवाक्यतयैव नियमशास्त्राणां विधायकत्वम् । तत्र धातोरिति विहितपञ्चमी तत्समानाधिकरणमनुदात्तङित इत्याद्यपि विहितविशेषणमेवेति न काप्यनुपपत्तिः । आत्मनेपदशब्दादौ भाविसंज्ञाश्रयणीयेति भाष्यादिसिद्धान्त इति दिक् ॥ ३ ॥

समासे पुनः सुशब्देन बहुव्रीहौ सुपचावि कुलमित्यत्र 'इति ऐ' इति न्यासे—आत्मनेपदसम्बन्धे वा दोषस्य सत्त्वेन तथा न्यासस्य कर्तुमशक्यत्वात्। आत्मनेपदसम्बन्धासंभवेन वा पचावेदमिति फलस्य तावत् सम्यक्तरत्वात् ॥ केचित्तु अदिद्रपत्-असूषुदत्-जगदम्बजागृढ इत्यादि फलानि ददति, तत्खण्डनादिकं विस्तरभयान्नोक्तम्। समकालप्राप्तिकस्य तु वृश्चतीति फलम्। अत्र पदसंस्कारपक्षे वलिलोपसम्प्रसारणयोः प्राप्तौ अन्तरङ्गत्वात् सम्प्रसारणम् धियति-असुस्रुवदित्यादि फलान्यपि मूलोक्तानि वेदितव्यानि ॥५॥

अन्तरङ्गशास्त्रत्वमस्यां लिङ्गमित्यत्र फलं प्रमाणं च दर्शय।

'सामर्थ्यं सर्वशब्दानां लिङ्गमित्यभिधीयते' इत्यभियुक्तोक्तेः शब्दसामर्थ्यं लिङ्गम्। तदेव परिभाषाया अङ्गभावे निमित्तम्। तच्चाऽन्तरङ्गशास्त्रत्व एवेति तत्रैवेयं प्रवर्त्तते, न तु बहिरङ्गशास्त्रत्वेनाप्यन्तरङ्गत्वे। अत एव पयस्यटति पयो ददातीत्यर्थे आगच्छ हे पयोऽट्! आगच्छ हे पयोद! इत्यादावुत्वदृष्टया प्लुतस्याऽसिद्धत्वं भाष्योक्तं सङ्गच्छते। अन्यथा बहिरङ्गस्य प्लुतस्य त्रिपादीस्थत्वेनाऽसिद्धतया परिभाषाया अप्राप्त्या परत्वात् प्लुत एव स्यात्। अत एव पूर्वत्रासिद्धमित्यनेन त्रैपादिकान्तरङ्गस्य

शास्त्रत्वेन रूपेणाऽसिद्धतया न तत्र परिभाषाप्रवृत्ति अन्यथा शास्त्रत्वेनासिद्धावपि तत्प्रवृत्तिर्दुर्वारा स्यादि नवीनाः ।

प्राचीनास्तु अन्तरङ्गत्वमेवास्याः प्रवृत्तौ निमित्त त्रिपाद्यामियं कार्यकालपक्षे प्रवर्त्तत एव। अत एव नाकृ कार्तिः सुद्ध्युपास्यः नार्मत इत्यादि सिद्धयर्थं विसर्ज योऽनुत्तरपदे १, निष्ठानत्वमवृद्धेः २, यणः प्रतिषेधो वक्त ३, नृमतौ वत्वप्रतिषेधो वक्तव्यः ४ इति वार्त्तिकचतुष्टयम रङ्गपरिभाषया प्रत्याख्यातं भाष्ये इत्याहुः । नवीना वार्त्तिकचतुष्टयं कर्त्तव्यमेव, उक्तयुक्त्या त्रिपाद्यां तदप्रवृ अत एवापुक्तोऽयं परिहारो न वा बहिरङ्गलक्षणत्वादि तत्र तत्र सिद्धान्तिनोक्तमित्याहुः । अत्रत्यविचारो ब कालसाध्य इति दिक् ।। ६ ।।

अर्थनिमित्तकत्वेन बहिरङ्गत्वं भवति, न वेति सम्प्र लिख ।

परिभाषायामङ्गशब्देन शब्दरूपनिमित्तिस्यैव ग्रहण शब्दशास्त्रे शब्दस्यैव प्रधानत्वात् तेनार्थनिमित्तकस्य बहिरङ्गत्वम् । अत एव तिसृणामित्यादौ दीर्घवारणाय तिसृचतस्रिति निषेधः सङ्गच्छते । अर्थनिमित्तकत्वेन ब रङ्गत्वे तु तिस्रादेशे त्रयादेशापेक्षया अधिकस्य स्त्रीत्वरूप

ंस्य निमित्तत्वेनाऽन्तरङ्गत्वात् त्रयादेशे सूत्रवैयर्थ्यं स्पष्ट-
ेव । अत एव च त्रयादेशे स्नन्तस्य प्रतिषेधो वक्तव्यः न
ाक्तव्यः सकृद्गतिन्यायेन सिद्धेरिति भाष्यवार्तिकादि सङ्ग-
च्छते । अत एव यद् गौधेरः पचेरन्नित्यादावेयादीनामङ्गसंज्ञा-
रूपार्थसापेक्षत्वेन बहिरङ्गतयाऽसिद्धत्वाद्वलिलोपः कथमित्या-
शंक्य बलिलोपेऽन्तरङ्गपरिभाषा न प्रवर्त्तते, चेले क्नोपेरिति
निर्देशादिति प्राचीनैः समाहितं तदपि परास्तम् । ननु
समुदायसापेक्षेयादेशापेक्षया वर्णद्वयापेक्षलोपस्यान्तरङ्गत्व-
मस्त्येवेति चेन्न; एयादेशादेरपरनिमित्तकत्वेनान्तरङ्गत्वात् ।
न चात्र किम्मानमिति वाच्यम् ? ऊकाल इति निर्देश-
स्यैव मानत्वात् । अन्यथा समाहारद्वन्द्वे उ + ऊ + ऊ ३
इति स्थिते परत्वात् सवर्णदीर्घे ततो नपुंसकह्रस्वे उकाल
इति स्यात् ।

ननु येन विधिरिति सूत्रस्थस्य सर्वत्र तदन्तविधिर्भव-
तीति पक्षे स्योन इत्यत्र दोषप्रतिपादकस्य भाष्यस्य
योजनाय गुणो ह्यङ्ग-सम्बन्धिनोमित्यादि कैयटग्रन्थेन
संज्ञारूपार्थनिमित्तकत्वेन बहिरङ्गत्वं स्पष्टमेवेति चेन्न ?
तदन्तविधावपि बहुपदार्थापेक्षत्वरूपबहिरङ्गत्वस्य गुणे
सत्त्वेन स्योन इत्यत्र दोषकथनपरभाष्यासङ्गतेः ।

अत एव भाष्ये ऊनशब्दमाश्रित्य यणादेशो नशब्द-

माश्रित्य गुण इत्यन्तरङ्गत्वाद् गुण एव स्यादित्युक्तम् । अनेन भाष्येण परिभाषायामङ्गशब्देन सप्तम्याद्यन्ततया उपात्तं शब्दरूपं निमित्तमेव गृह्यत इति स्पष्टमेवोक्तमित्यादि सन्दर्भो मूले प्रतिपादित इति दिक् ॥७॥

वलिलोपे अन्तरङ्गपरिभाषा न प्रवर्तते इत्युपपाद्य सयुक्तिकं खण्डय ।

चेले क्नोपेरिति निर्देशेन वलिलोपे अन्तरङ्गपरिभाषा न प्रवर्तते इति ज्ञाप्यते । तेन क्नोपयति, यातिः, पचेदित्यादि सिद्धम् ॥ अत्र णिज्निमित्तकस्य पुकः किन्निमित्तस्यातो लोपस्य प्रकृतिप्रत्ययोभयापेक्षत्वेन बहिरङ्गस्येयादेशस्य चान्तर्भूतनिमित्तकत्वेनाऽन्तरङ्गे वलिलोपे कर्तव्ये नाऽसिद्धत्वम् ।

एवमक्षद्यूरिति भाष्योदाहरणे ऊठोऽसिद्धत्वाद्वलिलोपो न । अत एव स्वर-दीर्घ-यलोपेषु लोपाजादेश एव न स्थानिवदित्यत्र यलोपग्रहणस्य वाय्वोरित्यत्र वलिलोपे स्थानिवत्त्वफलं भाष्ये दत्तम् । अन्यथाऽनयैव सिद्धे तद्वैयर्थ्यं स्पष्टमेवेति प्राचीनाः ॥

नवीनास्तु वलिलोपसूत्रे भाष्ये व्रश्चादिषु लोपमाशंक्य उपदेशसामर्थ्यान्न । न च वृश्चतीत्यादौ चारितार्थ्यमिति वाच्यम् ? बहिरङ्गतया सम्प्रसारणस्यासिद्धत्वेन पूर्वमेव

तत्प्राप्तेरित्युक्तम्, तेन उक्तपरिभाषाया अनित्यत्वस्याऽव-श्यमाश्रयणीयतयाऽतिप्रसङ्गवारणसम्भवाद् वृथेयं भाष्य-विरुद्धकल्पनेत्याहुरिति दिक् ॥ ८ ॥

विशेषापेक्षस्य बहिरङ्गत्वं सम्यगुपपाद्य सयुक्तिकं खण्डय ।

प्राचीनैरित्थमुक्तम्, विशेषापेक्षे विशेषधर्मस्याधिकस्य निमित्ततया तस्य बहिरङ्गत्वम्, यथा स्याद्यादित्यत्र अडीटोः विशेषापेक्षत्वेन बहिरङ्गतयाऽसिद्धत्वादन्तरङ्गत्वाद्याद्युनुट् । लकारविशेषापेक्षत्वेन स्यादीनां बहिरङ्गत्वमिति कैय-टोक्तन्तु न युक्तम्, सामान्यधर्मापेक्षशास्त्रापेक्षया अधिको धर्मो यत्र विशेषापेक्षे निमित्तकोटावाश्रीयते तस्यैव विशे-षापेक्षत्वेन बहिरङ्गत्वस्य स्वीकारात् । अत एव मतुप्सूत्रे पञ्च गावो यस्य सन्तीत्यर्थे पञ्चगुरित्यत्र मतुप्-प्राप्ति-परिहारप्रघट्टे अन्तरङ्गत्वाद्बहुव्रीहिः । कान्तरङ्गता? अन्य-पदार्थे बहुव्रीहिर्विशिष्टेऽन्यपदार्थे द्विगुस्तस्मिंश्चास्य तद्धि-तेऽस्तिग्रहणं क्रियत इति भाष्यस्य अधिकाऽस्त्यर्थापेक्ष-मत्वर्थनिमित्तो द्विगुर्बहिरङ्ग इति कैयटव्याख्यानं संगच्छते इत्यादि, तन्न सम्यक् । भाष्ये एवंविधान्तरङ्गबहिरङ्गभावस्य क्वाप्यनुल्लेखात् । स्याद्यादित्यत्र विशेषस्य व्याप्यत्वेन व्यापकस्यानुमानेनोपस्थितावपि तस्य निमित्तत्वे माना-भावेन अधिकधर्मनिमित्तकत्वानुपपादनात् । अच्सामान्या-

पत्तयणा विशिष्टसवर्णाजपेक्षदीर्घेण बाधदर्शनात् । उक्त
मतुप्सूत्रस्थभाष्यप्रघट्टे अधिकापेक्षत्वेनैव बहिरङ्गत्वस्य
श्रयणात् न केवलविशेषापेक्षत्वेनेति । अत एव भा
सुबन्तसामान्यापेक्षो बहुव्रीहिस्तद्विशेषापेक्षो द्विगुरि
नोक्तमित्यादिना मूले खण्डितमिति दिक् ॥ ९ ॥

पूर्वं धातुरुपसर्गेण युज्यत इति प्राचीनमतं सयुक्ति मुपपाद्य सप्रमाणं खण्डय ।

अनुभूयते उपास्यत इत्यादौ कर्मणि लकारसिद्धय
पूर्वं धातुरुपसर्गेण युज्यते पश्चात् साधनेनेति। (अस्यार्थः
उपसर्गेण तत्संज्ञकशब्देन साधनेन कारकप्रयुक्तकार्येणे
प्राचीनाः, तन्न विचारसहम्, तथा हि क्रियायाः साध्यरूप
तया साध्यस्य साधनाकांक्षतया साधनसम्बन्धोत्तरमे
निश्चितक्रियाबोधेन साधनकार्यप्रवृत्त्युत्तरमेव क्रियायोग
निमित्तोपसर्गसंज्ञकस्य सम्बन्धौचित्यात् । अत एव सुट्का
त्पूर्व इति सूत्रे पूर्वं धातुरुपसर्गेणेत्युक्त्वा नैतत्सारमित्या
दिना साधनं हि क्रियां निर्वर्तयतीत्यन्तेन सन्दर्भेण भाष्ये
उक्तम् । अनुभूयत इत्यादौ तु उपसर्गद्योत्यार्थान्तर्भाविण
धातुनैव तदर्थाभिधानात् कर्मणि लकारसिद्धिः । पश्चा
च्छ्रोतृबोधाय द्योतकोपसर्गसम्बन्धः । अत एव प्रणिदा
पयतीत्यत्र णत्वं यदागमा इति न्यायेन समाहितं भाष्ये ।

णेरध्ययने प्रत्यय इति निर्देशश्च सङ्गच्छत इत्यादिना मूले खण्डितमिति दिक् ॥ १० ॥

पूर्वोपस्थितनिमित्तकत्वमित्यस्य सन्दर्भपूर्वकं साधनसहितं फलं लिख ?

प्रागुक्तेषु अन्तःस्थितनिमित्तकत्वमित्यादिलक्षण-त्रितयेषु लक्ष्याऽनुरोधादावश्यकत्वमिति ध्वनयितुं नन्वेवम-सुस्रुवदित्यत्र लघूपधगुणादुवङोऽल्पनिमित्तकत्वाभावादुवङ् न स्यादित्याशंक्य परिभाषायामङ्गशब्दस्य निमित्तपरत्वेन पूर्वोपस्थितनिमित्तकत्वमित्यनुपदवक्ष्यमाण-भाष्यप्रामाण्येन स्वीकृत्य समाहितम्। तथा हि मनुष्योऽयं प्रातरुत्थाय स्वशरीरकार्याणि करोति, ततः सुहृदाम्, ततःसम्बन्धिनाम्, एवमर्थानामपि जाति-व्यक्ति-लिङ्ग-संख्या-कारकाणां शास्त्र-कृत्कल्पितो बोधस्तत्क्रमेणैव। तत्क्रमेणैव च तद्बोधक-शब्दप्रादुर्भावः कल्पितः, तत्क्रमेणैव च तत्कार्याणीति भाष्ये दर्शितम्।

अत एव पदविभज्याऽन्वाख्याने 'पटु + ई + आ' इति स्थिते परयणादेशस्य बहिरङ्गतयाऽसिद्धत्वात् पूर्वं यणादेशे पट्व्येति सिद्धमिति भाष्ये उक्तम्। इदमन्त-रङ्गत्वं तु समकालप्राप्तिकस्थले एव, न तु जातबहिरङ्ग-स्थले प्रागुक्तलोकन्यायेन तथैव लाभात्; अत एव वाय्यो-

रित्यत्र वलिलोपो यणः स्थानिवत्त्वेन भाष्ये वारितः, न त्वनया। क्रमिकाऽन्वाख्यानपक्षे तु पट्व्येत्यादौ पूर्वप्रवृत्तिकत्वमप्यन्तरङ्गत्वम् बहिरङ्गस्यासिद्धत्वमपि निमित्ताभावादप्राप्तिरूपं बोध्यम्। प्राचीनास्तु उक्तभाष्यप्रामाण्यात् पूर्वस्थानिकत्वमप्यन्तरङ्गत्वमित्याहुस्तच्चिन्त्यम्। स्रजिष्ठ इत्येतद्विषयकजातिपक्षाश्रयणपरक भाष्यविरोधादिति दिक्॥ ११॥

ऊठ्ग्रहणस्य स्वरार्थमावश्यकत्वेऽपि कथं ज्ञापकता ?

ननु प्रष्ठौह इत्यादौ ऊडिदंपदेत्यादिविहितस्वरार्थमूठ्विधानस्यावश्यकत्वे कथं ज्ञापकतेति चेन्न, उपधापदमुच्चार्य विहितस्यैवोठो ग्रहणं कर्तव्यमित्यर्थक-ऊठ्युपधा ग्रहणं कर्तव्यमिति स्वरविधायकसूत्रस्थभाष्यवार्त्तिके प्रकृते स्वरस्यानिष्टत्वात्, परिभाषाया ज्ञापकतापरभाष्य च्च। कौमुद्यां तदुदाहरणन्तु वृत्त्यनुसारेण। सिद्धान्ते तु जूरः जूरेत्येव तदुदाहरणम्। किंच स्वरविधायके वा ऊठित्यत्र च ह्रस्व एव कर्तव्ये दीर्घविधानं ज्ञापकमेव वृद्धिविधायके ह्रस्वकरणे तु अवतीति ऊः जनस्य उ जनौरिति न सिद्ध्येत्। ज्वरत्वरेत्यत्र ह्रस्वविधाने तु जूरि त्याद्यसिद्धेरिति दिक्॥ १२॥

ज्ञापकावतरणसहितं नाजानन्तर्यपरिभाषाया अर्थं निरूप्यास्या नवीनमतेऽनावश्यकत्वं सयुक्तिकमुपपादयत।

अक्षद्यूरित्यत्रान्तरङ्गे यणि कर्तव्ये बहिरङ्गस्योठोऽसिद्धत्वात् कथं यणित्याशयेन परिभाषामवतारयति नन्वेवमित्यादिना। अस्याञ्च षत्व-तुकोरसिद्ध इति सूत्रस्थं तुग्ग्रहणं ज्ञापकम्। अन्यथाधीत्येत्यादौ पदद्वयसम्बन्धिवर्णद्वयापेक्षस्यैकादेशस्यासिद्धत्वादेव तुक्सिद्धौ तद्वैयर्थ्यं स्पष्टमेव। यत्तु षत्वग्रहणमपि ज्ञापकमिति, तन्न; एकादेशस्येव षत्वस्यापि पदद्वयसम्बन्धिवर्णद्वयापेक्षत्वेन बहिरङ्गत्वस्य साम्यात्। त्रैपादिकेऽन्तरङ्गे बहिरङ्गपरिभाषाया अप्रवृत्तेश्च। परिभाषार्थस्तु अज्निष्ठान्यानन्तर्यनिमित्तकेऽन्तरङ्गे कर्तव्ये जातस्य बहिरङ्गस्य बहिष्ट्वं बहिरङ्गत्वम्, तत्प्रयुक्तासिद्धत्वस्य न प्रक्लृप्तिर्न प्राप्तिरिति। न चैवं अक्षद्यूरित्यत्र यणि कृते ऊठोऽसिद्धत्वाद्वलिलोपापत्तिरिति वाच्यम्? अचोऽन्यानन्तर्यनिमित्तकेऽन्तरङ्गे कर्तव्ये, कृते च तस्मिन् यदन्तरङ्गं प्राप्नोति तत्र च कर्तव्येनाऽसिद्धत्वमित्यर्थेनादोषात्। एतज्ज्ञापकेन बहिरङ्गपरिभाषाया अनित्यत्वबोधनेनैव सिद्धे वृथेयं परिभाषा। अत एव भाष्ये ग्रामणिपुत्र इत्यत्र तुकमाशंक्य बहिरङ्गत्वेन समाहितम्। अत एव च 'पटु + ई + आ' इत्यत्र परयणा-

देशस्य बहिरङ्गतया असिद्धत्वात् पूर्वयणादेशो भाष्ये साधितः । अत एव च भाष्ये एषा क्वापि नोल्लिखितेति मूलतो विवेचनीयम् ॥ १३ ॥

अन्तरङ्गानपाति परिभाषावतरणज्ञापकसहिता प्रतिपक्षमत निराकरणपूर्विकाऽविकलं दर्शनीया ।

ननु गोमान् प्रियो यस्येत्यर्थे पदद्वयनिमित्तकसमासाश्रितत्वेन बहिरङ्गं लुकं बाधित्वा अन्तरङ्गत्वाद्धल्ङ्यादिलोपे प्रत्ययलक्षणेन नुमादयः स्युरतः परिभाषामवतारयति—नन्वेवमित्यादिना । अस्यां च प्रत्ययोत्तरपदयोश्चेति सूत्रं ज्ञापकम् । अन्यथा त्वत्कृतमित्यादौ बहिरङ्गलुगपेक्षया अन्तरङ्गत्वात्त्वमावेकवचने इत्यनेनैव सिद्धं तद्वैयर्थ्यं स्पष्टमेवेति । न च तव पुत्रस्त्वत्पुत्र इत्यादौ तवममादिबाधनार्थं सूत्रस्यावश्यकत्वेन कथं ज्ञापकत्वमिति वाच्यम् ? उत्सर्गसमानदेशा अपवादा इति न्यायेन मपर्यन्तस्यैवादेशे सिद्धे उक्तसूत्रे मपर्यन्तानुवृत्तेरेव परिभाषाज्ञापकत्वमिति भाष्यसिद्धान्तेनादोषात् ।

अत्र प्राचीनाः युष्मदादिभ्य आचारे क्विपि प्रत्यये परे आदेशसम्पादनाय उक्तसूत्रे प्रत्ययग्रहणस्य चारितार्थ्येनोत्तरपदग्रहणमेव परिभाषाज्ञापकमित्याहुः, तन्न; सम्पूर्णसूत्रस्य ज्ञापकतापरभाष्यप्रामाण्येन ह्रस्वनद्यापिति सूत्रस्थ-

भाष्यप्रामाण्येन च हलन्तेभ्य आचारक्विपोऽनभिधानेनादोषात्। यत्तु उत्सर्गसमानदेशा अपवादा इत्यत्र प्रमाणाभाव इति वदन्ति, तन्न; तस्मिन्नणि च युष्माकास्माकावित्यनेन युष्माकाद्यादेशविधानस्यैव ज्ञापकत्वसम्भवात्। अन्यथा आकङादेशमेव विदध्यादित्यादिना मूले स्पष्टम् ॥ १४ ॥

पूर्वोत्तरपदनिमित्तकार्यादित्यादेरवतरणं सम्यग् विलिख्यास्या ज्ञापकत्वमनन्यसिद्धफलं च लिख।

ननु सोमेन्द्रौ देवते अस्य सौमेन्द्र इत्यत्रान्तरङ्गत्वादाद्गुणे पूर्वपदात्परेन्द्रशब्दाभावेन नेन्द्रस्य परस्येत्युत्तरपदवृद्धिनिषेधाप्राप्तौ निषेधो व्यर्थः। न चाऽन्तादिवद्भावेन तल्लाभ इति वाच्यम्? विरुद्धयोरेकदातिदेशासम्भवेन उभयत आश्रयणेऽन्तादिवद्भावाप्राप्तेः। न चोभयत आश्रयणमिह नाङ्गीक्रियते, किन्तु पूर्वान्तवद्भावेनैकारविशिष्टे 'सोमे' शब्दे पूर्वपदत्वमेकदेशविकृतन्यायेन 'न्द्र' शब्दस्योत्तरपदत्वमिति वाच्यम्? न्द्र इत्यस्यानच्कत्वेन वृद्धेरप्राप्तेः। न च परादिवद्भावेन एकादेशविशिष्टस्योत्तरपदत्वातिदेशो नोक्तदोष इति वाच्यम्? वृद्धेरुत्तरपदाद्यच्स्थानिकत्वेन ताद्रूप्यतयातिदेशाप्रवृत्तेः। ताद्रूप्यत्वञ्च स्ववृत्तित्व-स्वस्थानिकादेशावृत्तित्वोभयसम्बन्धेनान्तादिवर्णविशिष्टधर्मघटितधर्मत्वम्। अत एव खट्वाभिरित्यत्र भिस

ऐस् न । अत एव भाष्ये पूर्वेषुकामशम इत्यादावन्तरङ्गत्वा दाद्गुणे वृद्धिर्नेत्युक्तम् । तदेकदेशमात्रस्य विकाराभावेनैक देशविकृतन्यायप्रवृत्तेश्चेत्याशयेन परिभाषामवतारयति- नन्वेवमित्यादिना । अत्र च नेन्द्रस्य परस्येति वृद्धिनिषेध एव ज्ञापक इति बोध्यम् । अत्रत्यवाग्जालस्तु विस्तर भयान्न प्रपञ्चितः ॥ १५ ॥

वार्णादाङ्गं बलीय इत्यस्याः प्राचीनमते स्वमते च ज्ञापव मुपपाद्य स्वमते प्राचीनमते चाऽस्याः कुत्र प्रवृत्तिः? तत्स्वरूपं किमिति विशदय्य लिखत ।

ननु इयायेत्यादौ द्वित्वे कृते पूर्वोपस्थितनिमित्तकत्वे नान्तरङ्गत्वात्सवर्णदीर्घे उक्तरूपासिद्धिरतः परिभाषामव तारयति—नन्वेवमपीत्यादिना । एवञ्चान्तरङ्गमपि सवर्ण दीर्घं बाधित्वाऽचोञ्णितीति वृद्धौ आयि अभ्यासस्याऽसव इति इयङि रूपसिद्धिः । अस्याञ्चोक्तसूत्रेऽसवर्णग्रहणमे ज्ञापकम् । अन्यथा ईषतुरित्यादौ अन्तरङ्गत्वात् सवर्ण दीर्घे तद्वैयर्थ्यं स्पष्टमेव । न चेयङः सवर्णदीर्घबाधकत्व मिति कथमन्तरङ्गत्वाद्दीर्घ इति वाच्यम् ? येन नाप्राप्ति न्यायेन इयर्तीत्यादिसकललक्ष्यप्राप्तयणपवादत्वस्यैव निर्णय दिति प्राचीनाः । नवीनास्तु इयेष, इयायेत्यादौ द्विर्वचने चीति निषेधाद् रूपातिदेशाद्वा पूर्वं द्वित्वे ततोऽन्तरङ्गत्व

वर्णदीर्घे अभ्यासस्यासवर्णे इति सूत्रस्यैव वैयर्थ्येन ापकत्वम्, न चेयर्तीत्यादौ चारितार्थ्यमिति वाच्यम् ? र्तेरिवर्णस्येयङ् इत्यर्थकेन उरिति न्यासेनैव सिद्धेः। । च ए-ऐ-ओ-औ शब्देभ्य आचारक्विपि लिटि इयङाद्यर्थं ्त्रमावश्यकमिति वाच्यम् ? ज्ञापकतापरभाष्यप्रामाण्येन (र्वोक्तानामनभिधानात्। अत एव नहि अन्तरेण गुणवृद्धी असवर्णपरोऽभ्यासो भवतीति भाष्यं सङ्गच्छते। न चाकृत-व्यूहपरिभाषया सवर्णदीर्घप्राप्तिरिति वाच्यम् ? तस्या असत्त्वात् सत्त्वे वा ज्ञापकतापरभाष्यप्रामाण्येन यत्रान्तरङ्ग-प्रवृत्तियोग्यकालोत्तरमेव तन्निमित्तविनाशकबहिरङ्गविधेः प्राप्तिस्तत्रैव तस्याः प्रवृत्तिकल्पनादित्याहुः। इयञ्च धर्मि-ग्राहकमानादाङ्ग-वार्णयोः समानकार्यित्वे एव प्रवर्तत इति नवीनाः। तत्त्वञ्च वार्णशास्त्रीयस्थानितासमानाधिकरण-स्थानिताकत्वम्, तेन गाते गानः इयाय इत्यादिसिद्धिरिति दिक्॥

प्राचीनास्तु समाननिमित्तकत्वरूपसमानाश्रयत्वे एवैषा प्रवर्तत इत्याहुः, तन्न; ज्ञापितेऽपि इयाय, इयेषेत्याद्यसिद्धेः, सूत्रवैयर्थ्यस्य तदवस्थत्वाच्च। सतुक्निर्देशेनास्या अनित्य-त्वस्यावश्यकत्वेन स्योन इत्यत्र दोषाभावः। अन्यत्सर्वं मूलरीत्याऽवसेयम्॥ १६॥

अकृतव्यूहा इति परिभाषायां स्वमते प्राचीनमते च वि
उपपादनीयः ।

सदेर्लिटः क्वसौ द्वित्वादिकार्ये पदसंस्कारपक्षेऽन्तर
त्वादिटि ततः संप्रसारणेऽपोटः श्रवणापत्तिरतः परिभा
मवतारयति—नन्वेवमित्यादिना । अत्र दीक्षितादयः अकृ
व्यूहाः पाणिनीया इत्यस्य भाविनिमित्तविनाशे पाणिनी
न कृतो विशिष्ट ऊहो निश्चयः शास्त्रप्रवृत्तिविषयो यैस्त
भूता भवन्तीति । अर्थाद् बहिरङ्गेणान्तरङ्गस्य निमि
विनाशे पश्चात् सम्भावितेऽन्तरङ्गं न प्रवर्तयन्ति इति ।
च समर्थानामिति सूत्रे समर्थानामिति ज्ञापकम् । त
सूत्थितस्याऽपत्यं सौत्थितिरित्यत्र कृतदीर्घेभ्यः प्रत्ययोत्प
क्रियते । अन्यथाऽन्तरङ्गत्वाद्दीर्घे कृते एव प्रत्ययप्राप्त्या
यर्थ्यं स्पष्टमेवेत्याहुः । कैयटस्तु समर्थानामित्यनेनैव नि
त्तापाये नैमित्तिकस्याप्यपाय इति ज्ञापयति, तेन सूत्थिता
वृद्धौ दीर्घनिवृत्तौ सावुत्थितिर्मा भूदिति समर्थानामित
स्वांशे चारितार्थ्यम् । लोके हि निमित्तं द्विविधं दृश्यते, क
स्थितौ नियामकम्, तदनियामकञ्च । यथा न्यायमतेऽ
बुद्धिः, तन्नाशे द्वित्वनाशाभ्युपगमात् । वेदान्तमते प्रारब्ध
विक्षेपस्थितिनियामकत्वम् । द्वितीयं तु दण्डादि, तन्नाशे
घटनाशादर्शनात् । समर्थानामित्यस्यापि लोकसिद्धार्थज्ञा

ंरभाषया न लुगित्याहुः, इत्थं च बाधकत्वेन जिघृक्षित-
स्त्रीयविषयताविशिष्टधर्मवद् विषयताकशास्त्रस्य स्वेन
ध इति फलितम् ॥ वै० स्वनिरूपितव्यापकतावच्छेदकत्व-
ानिरूपितव्यापकतावच्छेदकधर्माभाववद्वृत्तित्वोभयसम्ब-
ान । एवं च कुत्रचिदन्यतरत्वेन कुत्रचिदन्यतमत्वेन व्याप-
तामादाय द्वयोस्त्रयाणां बाध इति दिक् ॥ १८ ॥

**अभ्यासविकारेषु बाध्यबाधकभावो नास्तीति परिभाषाऽवत-
गादिसहिता लेख्या ।**

ई च गण इति शास्त्रस्य गणरूपाभ्यासान्तस्येत्वमि-
यर्थे हलादिः शेषेण णकारनिवृत्तौ अनवकाशत्वमिति णका-
स्यैवेत्वेऽजीगणदिति न स्यादतः परिभाषामवतारयति—
ान्वित्यादिना । तेनाभ्यासविकारे बाध्यानामेव पूर्वं प्रवृत्तौ
शिष्टस्य सामर्थ्यादित्वे उक्तरूपसिद्धिः । अत्र च दीर्घोऽ-
कित इति सूत्रस्थमकिद्ग्रहणं ज्ञापकम्, यंयम्यत इत्यादौ
नुको दीर्घप्राप्तिविषयेऽचारिचार्थ्येनानवकाशतया पूर्वं नुकि
अनजन्तत्वादेव दीर्घप्राप्तौ तद्वैयर्थ्यं स्पष्टमेव । न चैवमपि
अकितोऽभ्यासस्य सत्त्वेन दीर्घप्रवृत्तेर्दुर्वारतया स्वांशे चारि-
तार्थ्याभाव इति वाच्यम्, यदि दीर्घो न स्यात्तर्हि नुकि सति
अकिदिति निषेधः स्यादिति सम्भावनयोपसञ्जनिष्यमाण-
न्यायेन पूर्वं दीर्घप्राप्तेः । परिभाषार्थस्तु—अभ्यासत्वावच्छि-

न्नोद्देश्यताककार्येषु बाध्यानां पूर्वं प्रवृत्तिरिति । यत्तु बा
बाधकयोर्यथा समावेशस्तथा कर्तव्य इति परिभाषार्थं इ
तन्न; बोभूयत इत्यादौ ह्रस्वे पश्चाद्गुणप्रवृत्त्या पूर्वं गुणे
पश्चाद् ह्रस्वप्रवृत्त्या च कदाचित् गुणोत्तरं ह्रस्वप्रवृत्ते
रत्वादिति दिक् ॥ १९ ॥

प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभा
अवतरणपूर्वकमर्थं निरूप्यानित्यत्वफलं परिभाषाज्ञापकञ्च ।

अतः कृकमीत्यनेन कुम्भरूपे उत्तरपदे विहित
अयस्कुम्भी इत्यत्र न स्यात्, अतः परिभाषामवतारय
नन्वित्यादिना । प्रातिपदिकसामान्यग्रहणे तद्विशेषग्रह
लिङ्गबोधकप्रत्ययविशिष्टस्यापि ग्रहणमिति परिभाषा
वैशिष्ट्यञ्च १ स्वघटितत्व–स्वनिष्ठविधेयतानिरू
द्देश्यताश्रयघटितत्व-स्वविशिष्टाघटितत्वैतत्त्रितयसम्ब
अत्र वै० स्वाघटकत्वस्वनिष्ठविधेयतानिरूपितोद्देश्यता
घटकत्वोभयसम्बन्धेन ।

अत्र च ज्ञापकं समानाधिकरणाधिकारस्थे कु
श्रमणादिभिरिति सूत्रे स्त्रीलिङ्गश्रमणादिशब्दपाठः स्
वेति बोध्यम् । इयञ्च घटघटीग्रहणादनित्या, तेन ति
ताप इत्यत्र खच् न, मद्रराज्ञी इत्यादौ राजाह इ
न, महतीप्रिय इत्यत्रान्महत इत्यात्त्वं न, दाक्षी अहि

यनीत्यत्र ञ्णिन्नित्यादेर्नित्यमिति स्वरो न, 'राजब्राह्मणी' जकुमारी' इत्यत्र ब्राह्मणकुमारयोरित्यादिना पूर्वपदप्रकृति-रो न, 'बहुगोमती' त्यत्र बहोर्नञ्वदुत्तरेति स्वरो न, कुसू-ोविलमित्यत्र कुसूलकूपेति स्वरश्च न इति दिक् ॥२०॥

सन्नियोगशिष्टानामन्यतरापाये उभयोरप्यपाय इत्यत्र किं पकं तदर्थश्च कः ? कथं चैनेयादीनां सिद्धिरित्यवतरणपूर्वकं स्पष्टं लिख ?

ननु पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्र इत्यादौ तद्धि-ार्थेति समासे द्विगुसंज्ञायां देवतार्थविहितस्याणो द्विगोर्लु-गिति लुकि लुक् तद्धित इति स्त्रीप्रत्ययलोपे आनुकः श्रव-णापत्तिरतः परिभाषामवतारयति—सन्नियोगेति । तथा च सन्नियोगशिष्टानां साहित्यावच्छिन्नविधेयताश्रयाणां मध्ये अन्यतरस्यैकस्य अपाये नाशे जाते सति उभयोरप्यपाय इति पञ्चेन्द्र इति सिद्धिः। अत्र च बिल्वकादिभ्यश्छस्य लुगिति सूत्रस्थं छग्रहणं ज्ञापकम् । अन्यथा बिल्वकादिभ्य इत्युच्य-मानेऽपि छस्यैव लुकि सिद्धे तद्वैयर्थ्यं स्पष्टमेव । न च छग्रहणाभावे स्वार्थिककान्तबिल्वकशब्दाददूरभवश्चेत्यणि तस्यापि लुक् स्यादिति वाच्यम् ? प्रतिपदोक्तस्य कृतकुगा-गमस्य नडाद्यन्तर्गतस्य बिल्वकशब्दस्यैव ग्रहणेनादोषात् । न च बिल्वकादिभ्य इत्यत्र कृतकुगनुवादसामर्थ्यादेव कुको-

ऽनिवृत्तिसिद्धौ छस्य कथं स्वांशे चारितार्थ्यमिति वाच्य
प्रतिपदोक्तस्य बिल्वादिभ्योऽणिति विकारार्थकस्या
लुगापत्तिवारणार्थं कुगनुवादस्य चारितार्थ्येन सामर्थ
भावात्। कैयटस्तु एनीमाचष्टे एतयतीत्यादिसिद्ध्यर्थं इ
वदित्यनेन पुंवत्त्वविधानमेतस्या अनित्यत्वज्ञापनार्थम्,
एन्या अपत्यमैनेय इत्यादिसिद्धिरित्यवोचत्, तदसत्;
विडमाचष्टे ऐडविडयति, दरदमाचष्टे दारदयति इत्
सिद्धये पुंवत्वस्याऽऽवश्यकत्वात्। कथं तर्हि ऐनेयः इ
इति न शंक्यम्, अचः परस्मिन्नित्यनेन पूर्वस्थितौ कर्तव्
स्थानिवद्भावादिति दिक्॥ २१ ॥

सन्निपातपरिभाषाया अवतरणं ज्ञापकं फलमनित्यत्वे प्र सन्निपातस्वरूपं के दोषाः साकल्येन परिगणिता इति च लिख।

ननु ष्णान्ता षडित्यत्र षान्तसाहचर्यादौपदेशिकन
स्यैव ग्रहणेन शतानीत्यादौ दोषाभावेऽपि उपादास्तेत्य
कृते स्थाघ्वोरिच्चेतीत्त्वं स्यादतः परिभाषामवतारय
सन्निपातेति। द्वयोः सम्बन्धः सन्निपातस्तन्निमित्तो
स्वातिरिक्तसम्बन्धविघातकस्य शास्त्रस्याऽनिमित्तं भव
परिभाषार्थः। पितुरुत्पन्नः पुत्रः पितरं न हन्यादिति लौ
दृष्टान्तेन उपजीव्यविरोधस्यायुक्तत्वमिति न्यायमूलै

ज्ञापकसाध्या । अत एव सन्निपातशब्देन न पूर्वपरयोः सम्बन्ध एव, किन्तु विशेषणविशेष्यसन्निपातोऽपि गृह्यते । तेन ग्रामणि कुलमित्यादौ नपुंसकह्रस्वे तुकि सति अजन्तत्वविघातसम्भवादनया तुग्वारितो भाष्ये । कष्टाय क्रमणे इत्यादिनिर्देशेन अनित्यैषा, तेन रामायेत्यादौ दीर्घः सिद्धः । यत्तु सन्निपातशब्देन पूर्वपरसम्बन्धस्यैव ग्रहणमिति मत्वा अङ्गसंज्ञा तर्हि अनिमित्तं स्यादित्युक्तं भाष्ये । तत्तु बहुभाष्यविरोधादेकदेश्युक्तमिति न विरोधः । कुम्भकारेभ्य आदये इत्यत्राऽनयाऽव्ययसंज्ञावारणपरकभाष्येण साक्षात् परम्परया वा स्वनिमित्तसन्निपातविघातकस्य स्वयमनिमित्तमित्यर्थः; तेनाऽकजपि नेति । न यासयोरित्यादिनिर्देशाच्चैषाऽनित्या, अत एव वर्णाश्रयः प्रत्ययो वर्णविचालस्याऽनिमित्तम्—दाक्षिः । आत्त्वं पुग्विधेः—ज्ञापयति । पुक् ह्रस्वत्वस्यादीदपत् । त्यदाद्यकारष्टाब्विधेः—या सा । इड्विधिराकारलोपस्य पपिवान्, ह्रस्वनुड्भ्यां मतुप्, अन्तोदात्तादुत्तरपदादिति मतुब्विभक्त्युदात्तत्वं पूर्वनिघातस्य—अग्निमान् परमवाचा । नदीह्रस्वत्वं सम्बुद्धिलोपस्य—नदि कुमारि । यादेशो दीर्घत्वस्य कष्टायेत्यादिदोषाः भाष्ये परिगणिताः । अत्रत्यसूक्ष्मविचारो ग्रन्थोक्तसकलविचारश्च बहुकालसाध्य इति दिक् ॥ २२ ॥

श्रुतानुमितयोः श्रुतसम्बन्धो बलीयानिति परिभाषाय ज्ञापकं फलं चोपपाद्यताम् ।

ननु प्रियसक्थ्ना ब्राह्मणेनेत्यत्राऽङ्गस्य नपुंसकत्वाभा वादस्थिदधीत्यनेन कथमनङित्यतः परिभाषामवतारयति-नन्वित्यादिना । प्रत्यक्षसामग्रीजन्यप्रमितिकरणं दुर्बलसाम ग्रीजन्यानुमानापेक्षया प्रबलमिति सकलतन्त्रव्यवहारात सिद्धेयम् । एवं च लिङ्गमस्थ्यादीनामेव विशेषणं नाङ्गस्येति न दोषः । यत्र तु गृह्यमाणस्याभावस्तत्रानुमितस्यैव विशे षणं लिङ्गम्, यथा शिशीलुङ्नुम्विधिषु अङ्गस्यैव विशेषण लिङ्गम् । अत एव वा नपुंसकस्येति सूत्रे नपुंसकग्रहणं चरि तार्थम्, अन्यथा वा शावित्येव वदेत्, तद्धि गृह्यमाणशत्रन्त विशेषणम् । तेन बहवो ददतो येषु तानि बहुददतीत्यत्र न बहूनि ददन्ति येषु ते बहुददन्त इत्यत्र भवतीति भाष्ये स्पष्टम् । यत्तु अचो रहाभ्यामित्यत्र श्रुतेन रेफस्य निमित्त त्वेनानुमितं कार्यित्वं बाध्यत इत्येतदुदाहरणमिति, तन्न तक्रन्यायेन सिद्धेरिति मूले स्पष्टम् ॥ २३ ॥

लक्ष्ये लक्षणं सकृदेव प्रवर्त्तेत इत्यत्र किम्मानं किं तल्लक्ष्यत्वं येन षट्सन्तः, ण्यन्तात् णिचि इत्यत्र न्यायो न प्रवर्त्ते दीव्यतीत्यत्र प्रवृत्तिरिति स्पष्टं लिख ?

ननु ऊखतुरित्यत्र पुनर्ह्रस्वाप्रवृत्त्यर्थं स्वीकृते लक्ष्येल क्षणन्याये मानाभाव इति चेन्न; समो वा लोपमेक इति लोपे

कसकारस्य, द्वित्वेन द्विसकारस्य, पुनर्द्वित्वेन त्रिसकारस्य सिद्धौ समः सुटीति सूत्रस्यैव मानत्वात् । यूनः विद्धः दवोढामिति सिद्धये भाष्ये उक्तत्वाच्च । अत्र विकार-तो लक्ष्यभेदो नाश्रीयते तेन सुद्ध्युपास्य इत्यादावदोष इति भाष्ये स्पष्टम् । सकलदोषपरिहाराय तल्लक्ष्यत्वन्तु स्वीयप्राथमिकप्रवृत्तावुद्देश्यतावच्छेदेकावच्छिन्नत्वेनाश्रीयमाणो यावाञ्छब्दसमुदायस्तद्घटको यस्तदघटकमात्रोद्देश्यकविकारागमातिरिक्तस्तदघटकत्वे सति स्वीयप्राथमिकप्रवृत्त्युत्तरकालिक-प्राप्तिभिन्नप्राप्तिविषयाघटितत्वम् । लक्षणकृत्वं पद्-त्सन्तः यूनो विद्धः सर्वेषां सुद्ध्युपास्य इत्यादिलक्ष्येषु सुधीभिर्विचार्यमिति दिक् ॥ २४ ॥

उपपदविभक्तेरित्यस्यावतरणं विविच्य आक्षेपनिराकरण-पूर्वकं सप्रमाणं कारकविभक्तित्वं लक्षणीयम् ।

ननु नमस्करोति देवानित्यत्र नमःशब्दस्य नमस्कारार्थद्योतकतया परत्वान्नमःस्वस्तीति चतुर्थी कुतो नेति चेन्न, नमःपदविशिष्टात् प्रातिपदिकाच्चतुर्थीत्यर्थात् वै० स्ववाच्यार्थनिष्ठविषयतानिरूपितविषयताप्रयोजकत्वसम्बन्धेन । एवं च प्रकृते दोषाभावेऽपि नमस्यति देवानित्यत्र नमःशब्दस्यैव नमस्कारार्थवाचकत्वाद्धातुत्वाच्च द्वितीयाचतुर्थ्योः प्राप्तौ परत्वाच्चतुर्थी स्यादतः परिभाषामवतारयति—

नन्वित्यादिना। सहयुक्तेऽप्रधान इत्यत्र अप्रधानग्रहणप्रत्य ख्यानाय भाष्ये वचनरूपेण पठितेयम्। तेन प्रथमाया अ कारकविभक्तित्वमिति प्रतीयते, तत्त्वं च क्रियाजनकार्थकवि भक्तित्वम्, कारकत्वव्याप्यकर्मत्वादिबोधकविभक्तित्वं वा अत एव 'मातुः स्मरति' इत्यादौ मातृविषयकस्मरणप्रतीत्य न षष्ठ्यास्तत्त्वम्। यत्तु क्रियान्वयित्वं कारकत्वं तन्निमित्त विभक्तिः कारकविभक्तिरिति, तन्न; अनेन न्यायेन यस्य च भावेनेति सप्तम्यपेक्षयाऽधिकरणसप्तम्या बलवत्त्वप्रतिपाद कभाष्यविरोधात्। अत एव प्रधानीभूतक्रियासम्बन्धनिमित्त कार्यत्वेन कारकविभक्तीनां बलवत्त्वमिति वदन्तः परास्ताः यदपि उक्तन्याये मानमुपदर्शयन् क्रियाकारकसम्बन्धोऽन्त रङ्गास्तन्निमित्ता विभक्तिरन्तरङ्गा उपपदार्थेन तु यत्कि ञ्चित्क्रियाकारकभावमूलकः सम्बन्ध इति तन्निमित्ता सा बहिरङ्गेति कैयटादिः, तत्तुच्छम्; उक्तभाष्यविरोधादिति दिक्॥ २५॥

अनन्त्यविकार इति परिभाषा मतान्तरनिरासेन सफल व्याख्यायताम्।

ननु अदमुयङित्यादावदसोसेरित्यनेन पूर्वस्यापि दकारस्य मुत्वं कुतो नेति परिभाषामवतारयति—अनन्त्यविकारे

इत्यादि । न अन्त्यस्य विकारो येन तन्निकृष्टा [illegible] देशस्येत्युपतिष्ठते इति परिभाषार्थः, तेन [illegible] स्या ऽन्त्यसदेशस्य दस्य मत्वं प्रत्यासत्त्या [illegible] मिति प्रकृतरूपसिद्धिः । अमू इत्यादौ विशेषणेन [illegible] भेदान्मत्वविधायकशास्त्रस्यान्त्योद्देश्यकविकार [illegible] तत्र परिभाषाप्रवृत्तिः सुलभा । अन्त्यसदेशा [illegible] प्रयोगे युगपत्प्राप्तावन्त्यसदेशस्यैवेति मूलोक्त [illegible] कथनम् । अन्त्यसदेशत्वं च कार्यि [illegible] अथवा अन्त्याल्विशिष्टत्वम् वै० स्वपूर्व [illegible] पूर्वत्वाभाववत्त्वोभयसम्बन्धेन अदमुयङ् [illegible] यूनः, हंसशिरांसि, अनस्तक्ष्णा, भिनत्ति [illegible] कृत्यं स्वयमूह्यम् । प्राचीनास्तु अनन्तर [illegible] णाय अनेकक्लिष्टकल्पनां कृत्वा परिभाषा [illegible] तन्न; व्याख्यानाद्वरं करणमिति न्यायेन परिभाषा [illegible] वौचित्यात् । अत एव भाष्ये फलानि [illegible] भिरन्यथासिद्धिं प्रदर्श्यापि यान्येतस्याः परिभाषायाः [illegible] नानि तदर्थमेषा कर्त्तव्या, यत्र च परिभाषाणां [illegible] तत्रोदात्तः पठनीयः; अनुदात्तत्वं च परिभाषा [illegible] मित्याद्याशयमुक्तम् । [illegible] भाष्ये वचनरूपेण पठितेयमिति दिक् ॥ २६ ॥

लक्षणप्रतिपदोक्तपरिभाषाया अवतरणं विविच्य प्रतिपदोक्तस्वलक्षणं निर्दुष्टं विलिख्य वर्णग्रहणे प्रवृत्तावप्रवृत्तौ च साधकं लिख ?

ननु परमेण कारकेणेति परमकारकेणेत्यत्र परिनिष्ठितविभक्त्या विशेषणसमासेऽपि तत्पुरुषत्वस्य तदीयपूर्वपदे, तृतीयान्तत्वस्य च सत्त्वेन तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या इत्यनेन स्वरः कथन्न, तथा पै शोषण इत्यस्यात्वे कृते गातिस्थेति लुक् कथन्नेति परिभाषामवतारयति—लक्षणप्रतिपदोक्तयोरित्यादि । एवं च तत्तद्विभक्तिविशेषाद्यनुवादेन विहितः समासादिः प्रतिपदोक्तस्तस्यैव ग्रहणं शीघ्रोपस्थितिकत्वात्, द्वितीयस्तु विलम्बोपस्थितिकः, एवं पै इत्यस्य पा इति रूपं लक्षणानुसन्धानपूर्वकं विलम्बोपस्थितिकं पिबतेस्तु तच्छीघ्रोपस्थितिकमिति न दोषः । इदमेव हि एतत्परिभाषाबीजम् । अनदोऽदोऽभवदित्यदो भवदित्यत्र ओदिति प्रगृह्यत्ववारणाय अस्या भाष्ये सञ्चारेण वर्णग्रहणेऽप्येतत्प्रवृत्तिरिति बोध्यते । यत्तु चेता स्तोतेत्यादावात्वाभावाय कृतेन आदेच उपदेश इत्यत्रोपदेशग्रहणेन वर्णग्रहणेऽस्या अप्रवृत्तिरिति तन्न, गोभ्यामित्यादावात्वाभावायोपदेशग्रहणस्य चारितार्थ्यात् । ननु घटे आत्वे धापयतीत्यत्र पुक् न स्यादिति चेन्न; भुवश्च

महाव्याहृतिग्रहणेनानित्यत्वज्ञापनात् । प्रतिपदोक्तत्वं च [illegible] तदर्थे विशेषणतया प्रतिपदोक्तत्वं विवक्षितं [illegible], वै० स्ववृत्त्यानुपूर्व्यवच्छिन्नविधेयताश्रय[illegible]कपदवृत्त्यानुपूर्वीमत्पदप्रयोज्योद्देश्यतानि[illegible]त्वान्यतरसम्बन्धेनेत्यन्यत्र विस्तर इति दिक् ॥ [illegible] ॥

श्तिपाशपानुबन्धेनेति परिभाषाग्रर्थं [illegible] सिद्धान्तमविकलं लिख ।

ननु यङ्लुकि तत्तद्गणप्रयुक्ता [illegible] निषेधश्च कुतो नेति परिभाषामवतारयति [illegible] । एकाच उपदेशेऽनुदात्तादित्य[illegible] 'स्थालीपुलाकन्यायेन' परिभाषा [illegible] । नागेशभट्टास्तु एकाज्ग्रहणस्य [illegible] ज्ञापकत्वासम्भवः । न च [illegible] वाच्यम् ? साक्षादुपदेशग्रहणेन [illegible] स्थान्युपदेशग्रहणे मानाभावात्, [illegible] जित्यर्थश्च । न चानुदात्तत्वस्याप्यु[illegible] ग्रहणेन वधादेशस्योदात्तत्वनिपातनेनावधीदित्यत्र [illegible] प्राप्तावेकाज्ग्रहणं व्यर्थमेवेति वाच्यम् ? [illegible] विण्निषेधाय श्रयुकः कितीत्यत्रोपदेशग्रहणस्यावश्यकतया

जागरितवानित्यत्र निषेधाप्रवृत्त्यर्थमुत्तरार्थमेकाज्ग्रहणस्यावश्यकत्वात्, अत एव भाष्ये अस्या अनुपन्यासः । चर्करीतं चेत्यस्यादादौ पाठेन यङ्लुगन्ते गणान्तरप्रयुक्तविकरणाप्राप्तिः । यङ्लुकश्छान्दसत्वेन छन्दसि दृष्टस्यैवानुविधानात् कार्यान्तराणामप्यप्राप्तिः । भाषायान्तु तादृशानामभाव एवेत्याहुरिति दिक् ॥ २८ ॥ साम्बशिवार्पणमस्तु ।

छात्रोपकृतये सैषा परिभाषेन्दुदीपिका ।
ज्येष्ठे समाप्ता शाकेऽष्ट-वेदवस्विन्दुसम्मिते ॥

बटवोऽबटवोऽप्यस्य पटुतां प्राप्य धारणात् ।
कुर्युः श्रमस्य साफल्यं हरिशङ्करशर्मणः ॥



❀ इति परिभाषेन्दुदीपिका समाप्ता ❀